Sri Vidyadhisha Granthamala No. 1

AṆUVIDYĀDHĪSHAVIJAYA

Satyavijayacharita and Satyaprajnacharita

[Sanskrit Text with a Summary in English]

Edited by
Prof. K. T. PANDURANGI

ORE

Sri Vidyadhisha Granthamala No. 1

LOCATION
52-B-3

ANUVIDYADHISHAVIJAYA

Satyavijayacharita and Satyaprajnacharita

[Sanskrit Text with a Summary in English]

Edited by
Prof. K. T. PANDURANGI

BANGALORE
1987

Copies can be had from

Prof. K. T. PANDURANGI
132/4, III Block, Jayanagar
Bangalore 560 011

Price: Rs. 6

015,1M

ABOUT THIS BOOK

Anuvidyadhishavijaya is recently published both in Devanagari and Kannada Script with the translation in Kannada. The Satyavijayacharita and Satyaprajnacharita are also added to it. However, this cannot be utilised by those who do not know Kannada. Therefore, a few copies of the Sanskrit Text with a brief English Summary are made available for such persons. It is hoped that the interested persons will utilise this book.

K. T. Pandurangi

Sri Vidyādhīsha tīrtha

Ānanda bhattāraka the father of Sri Vidyadhisha tirtha

On the bank of the river Godavari there is a small Town called Punyastambhapura. (This Town is now called Punatambe. It is in Ahmednagar district of Maharashtra). In this town the ancestor of the Pandurangi family i.e., Pandurangi Ānanda bhattaraka lived during 1500—1580. He was not a learned man initially though he belonged to a learned family. He propitiated Goddess Mahalakshmi at Kolhapur for twelve years. Goddess Mahalakshmi appeared in his dream and told him that she would appear before him in the form of a serpent next morning and he should hold her. Accordingly she appeared before him when he was meditating upon the Goddess standing before her. The serpent moved round the image of Goddess Mahalakshmi thrice. Anandabhatta remembered the dream and tried to take the serpent by hand as it was entering into a nearby hole. He could touch the serpent once by his ten fingers and once again by one. Thus he secured learning, wealth, and noble progeny for eleven generations with the blessings of Goddess Mahalakshmi.

He then proceeded to Vārānasi to study Shāstras. He became a great scholar and returned to his native place Punyastambhapura.

Ānandabhatta was a contemporary of Sri Vādirajatirtha the famous pontiff of Sode Matha i.e., one of the eight Mathas of Udupi. Once an Advaita scholar wanted to have philosophical debate with Sri Vādirājatirtha and invited him to Paithan for a debate. When Sri Vādirājatirtha went there, the Advaita Pandit wanted time and went on postponing the debate. As Sri Vādirājatirtha had to return urgently to Udupi to take charge of his paryāya, he appointed Anandabhatta to debate with that Pandit and gave him mantrākshata. Later Anandabhatta defeated that Pandit in the debate and brought Jayapatrikā from him. Sri Vādirajatirtha was pleased with this service of Anandabhatta and blessed him that he would get a son similar to Sri Vādirajatirtha himself. This event is recorded in Sri Vādirājaguruvaracharitāmrita composed by Ramachandracharya. (The verses giving these details are included in the Sanskirt text.)

As a result of this, Anandabhatta begot a son i.e., Narasimha, the would-be Sri Vidyādhishatirtha. Anandabhatta had already a son Srinivasāchārya. Later he got a third son Keshavāchārya who became well known as Gururaja. It is also reported that Keshavāchārya was the son of Timmannabhatta the elder brother of Anandabhatta but brought up by Anandabhatta. In any case, Anandabhatta's three sons became great scholars in due course.

Anandabhattāraka is also known for his work Nyāyāmritakantakoddhāra. This is a commentary on Nyāyamrita. It criticises Advaitasiddhi of Madhusudhana Śarasvati. Anandabhatta is remembered for this great work and his great son Narasimhacharya. Anandabhatta was a disciple of Sri Raghuttamatīrtha of Uttaradi Matha.

Narasimhacharya's early career

Narasimhāchārya studied shāstras under his father. He became a great scholar in Nyāya, Mimāmsā, Vyākarana and Vedanta when he was just sixteen years old. He started teaching these shāstras at Trivikrama temple in Punyastambhapura. He defeated Sivapandita and Visvapandita in a debate in Vyākarana Shāstra. Similarly he defeated Golinga pandita in Nyāya and Tānabhatta in Srautasūtras.

Around 1600 A.D. there was a Muslim invasion on Punyastambhapura. Narasimhachārya had to leave that town with his family and disciples. He went to Nasika Tryambaka and lived there for two years. Later Dattapandita the son of Naganatha invited him to Sangamner and Paithan. This Naganatha Dattapandita was a subedar at Paithan under Shahaji the father of Shivaji. He later became the Subedar of Bangalore. From Paithan Narasimhacharya went to Pandharpur. There was an old

*

matha at Pandharapur established by Sri Padmanabhatirtha. Sri Madhvacharya had visited this Matha. Narasimhacharya renovated this Matha. Here one Narasapandita was defeated in a debate by Narasimhacharya. This Narasapandita went to Bijapur and was given shelter by one Lingojipandita. This Lingojipandita was a member of the team that went to meet the Moghal Emperer on behalf of Adilshah of Bijapur. Narasimhacharya was also invited to Bijapur by one Lakshmana Pandita. Here Narasapandita once again debated with Narsimhacharya and was defeated.

Narasimhacharya was given sanyasa and named as Vidyadhishatirtha

At this time, Vedavyāsatirtha of Uttaradimatha was camping at Mannur on the bank of the river Bhima. He asked Narasimhacharya to meet him. He gave him sanyasa and made him his successor for the peetha. He named him as Vidyādhishatirtha. With the blessings of his Guru Vidyadhishatirtha undertook a tour. He went to Sangli on the bank of the river Krishna for his first chāturmasya. Then he went to Karavirapura or Kolhapur. He toured Karhad area consisting of the present Satara and Sangli districts in Maharashtra. He returned to Penugonda to meet his Guru Sri Vedavyāsatirtha.

Then he was invited by Chāmarajendra of Srirangapattana. This ruler was suffering from food allergy. Sri Vidyādhishatirtha cured his allergy by sprinkling theertha over his food. Pleased at this, Chamaraja donated three villages to him. Sri Vidyadhisha established Mukhyaprana image in a village called Chandaguru and also Srirangapattana in the premises of Uttaradimatha. He toured the whole of South India. After visiting Ramesvaram he went to Udupi. From Udupi he went to Ikkeri and defeated Rangojibhatta in a philosophical debate. The event of this debate is recorded by Kondabhatta in his work Vaiyakaranabhushanasāra in the closing verses. There is a small manuscript i.e. Rangojibhattaparajaya giving details of this debate. Then he returned to Penugonda. At this time Sri Vedavyāsatirtha entered into Vrindavana. Sri Vidyadhisha performed his guru's ārādhana in a fitting manner. He distributed five thousand gold coins as dakshinā to the pandits assembled on the occasion.

Sri Vidyadhisha's tour of South India and Godāvari-pradakshinā

Sri Vidyadhishatirtha once again visited Udupi and performed his chaturmasya. During this stay he composed a commentary, viz., Vākyārthachandrikā on the first five adhikaranas of Nyāyasudha. Then, he proceeded to conduct a pradakshinā of the

river Godavari. He started the pradakshinā from Nāsikatryambaka where the river originates. From this place he proceeded along the bank of the river with hundred pandits, visited Bhadrachala, Konasimā, and Antarvedi. From there he took the round of the seven streams of Godavari and started his return journey. He went to Dharmapuri on the way and finally returned to Nasikatryambaka.

Then he proceeded to Chola country again. On his way he visited Tirumala and offered his services to Lord Venkatesvara. He visited Kalahasti and reached Srirangam. He performed his Guru's āradhanā at Srirangam in a grand manner. Tirumala Nayak the chieftain of Trichanapalli came and paid his respects to Sri Vidyādhishatirtha and provided all the supplies for the āradhanā. Then he went to Tanjavur and was honoured by Raghunatha Nayaka. Further, he went to Kumbhakonam. He met Sri Sudhindratirtha who was camping at Kumbhakonam. The two honoured each other. Then he proceeded to Madhurai and finally reached Ramesvaram. From Ramesvaram he returned to Dharmapuri on the bank of the river Godavari. This was an important centre of Uttaradimatha in those days. Sri Vasudevayati Purnabodhacharya etc., prominent disciples of that town, welcomed him. He performed his chaturmāsya at Dharmapuri.

Sri Yādavarya, his purvaśram younger brother Keshavāchārya (Gururaja), Srimushnam Anantacharya, Rotti Venkatabhatta, Dharmasuri and several other distinguished scholars used to sit at the feet of Sri Vidyadhishatirtha and study Sri Nyāyasudha. During his stay at Dharmapuri two Advaita scholars i.e., Ramabhadrasramin and Kamadeva were engaged in philosophical debate and were defeated.

Sri Vidyadhisha's North Indian tour

Then he decided to tour North India and visit Badarikshetra. He entrusted the worship of Sri Mula Rama to his disciple and successor Sri Vedanidhitirtha and proceeded towards Prayaga. Taking a bath at the Triveni confluence and worshipping Veni Mādhava he went to Varanasi. He discoursed on Dvaita philosophy at Varanasi in the assembly of great scholars. The well-known Advaita Scholar Brahmendra Sarasvati who was then residing in Varanasi was disturbed by this programme. However, a confrontation was avoided and Sri Vidyādhishatirtha proceeded to Gayā. The Gayāvādas demanded high fees for pindadāna from the disciples of Uttaradimatha. They were Tantrikas and were proud of their position. Sri Vidyādhisha showed his miraculous power to them by making the Vatavriksha grow, which had gone dry for some time, by

Tirthaprokshana. They were wonderstruck and received Madhvadīkshā from Sri Vidyadhisha. They follow Dvaita faith even now. He got a building for Uttaradimatha built in the premises of Vishnupada temple. He established a Mukhyaprana image at the Matha. Uttaradimatha here has the privilege of offering naivedya to Vishnupada everyday.

From Gayā he proceeded to Ayodhyā, Mathurā, Vrindavana, Kurukshetra and finally reached Badarikshetra. He worshipped Lord Narayana with great devotion. Returning from Badari he reached Ekachakranagara situated in the valley between Yamunā and Gangā. He informed his disciples that he proposed to enter Vrindavana. A Vrindavana was prepared on the bank of river Gangā and he entered the same with Yogic Power in the presence of his disciples. His disciples brought the images of the deities worshipped by him to Dharmapuri and handed them over to his successor Sri Vedaninidhitirtha. Sri Vedanidhitirtha worshipped the deities keeping them by the side of Sri Mula Ramadeva pratima that was already given to him. Thus, Sri Vidyadhisha added a great chapter to the history of Sri Uttaradimatha and Dvaita sampradāya.

An image of Sri Vidyadhishatirtha was prepared when he was at Prayaga at the request of one

Narasappa, a great devotee of Sri Vidyadhisha. This Narasappa later took sannyasa from Sri Vidyadhisha and became Narasimhayati. He brought this image to Dharmapuri. It was there for about a century. This Narasimhayati has written Khandartha for the Upanishads. Later Pandurangi Balayyacharya brought the image to Masuru in Dharwad district which was then the head-quarters of Pandurangi family. After another century Pandurangi Huchcha-charya of Tumminakatti brought it to Ranebennur. A Matha was established there and āradhanā is being performed every year. Thus, now Ranebennur is the head-quarters of Pandurangi family though there are only two or three families left over now. (A Photograph of this image is included in this booklet at the commencement of the Samskrit Text.)

Sri Satyavijayatirtha

Srinivasacharya the father of Sri Satyavijaya

Sri Vidyādhisha's younger brother Sri Keshava charya (Gururaja) had two sons viz. Srinivasacharya and Narasimhacharya. The elder son Srinivasa-charya settled in Mannaragudi near Rajagopala-puram in Tamilnadu. One Meruswamy a disciple of Samartha Ramadasa of Maharashtra had come down to Tiruvannamalai. He established an Agrahara

near Mannaragudi on the banks of the river Haridrā. He invited a few Deshastha Brahmana scholars to settle there. Pandurangi Srinivasacharya son of Keshavacharya was one of them. He was known as Gaddada Srinivasacharya as he used to have a beard. He also used to wear Muslim dress in the evening. This was probably because of the political conditions in those days. Muslim rulers of those days used to hunt prominent Hindu personalities and it was necessary for the latter to hide themselves. This probable political reason apart, this Srinivasacharya being a great scholar and a highly religious man had foreseen that his prārabdha karma required him to take another birth and undergo certain sufferings. He wanted to undergo those in this very birth. Therefore he functioned like a Muslim after his day's normal religious programme was over. There is also a story that once he visited a disciple's place in Srirangam. The disciple's wife refused to take tīrtha from this Acharya on the ground that he dressed like a Muslim for a part of the day. But after that day's religious programme was over, when the Acharya was taking rest in his room she peeped into it and saw a serpent in his place. She realised that he was a great spiritual personality and received tirtha from him.

Sri Satyavijaya's early career

This Gaddada Srinivasacharya had four sons. One of them was Bābācharya, the would-be Satyavijayatirtha. This Bābācharya who was also known as Bālācharya studied shāstras under his father and under Sri Satyapurnatirtha. He taught shāstras to persons like Varakhedi Timmannacharya who has written Vishnutatvadipika and other works. Bābācharya maintained agnihotra and performed several yāgas. Once he was performing a yāga on the banks of river Haridrā. At that time Sri Satyapurnatirtha, then head of Uttaradi matha, arrived at that place. In order to test the devotion of his disciple Sri Satyapurna sent word to Bābācharya saying that he should throw all articles of yāga into Haridrā and come to him. Bābācharya immediately did so and met his Guru. Pleased with this Sri Satyapurna gave him Sannyāsa and named him as Satyavijaya. He took him for touring Karnataka with him.

Sri Satyapurna proceeded to Varanasi and asked Sri Satyavijaya to tour the Chola country on his own. He had given him Anusamsthāna. Sri Satyapurna had also given Sannyāsa to another learned scholar before and had named him as Sri Satyavarya. There arose a problem as to who should be the successor to Sri Satyapurna on the peetha of

Uttarādimatha. A senior disciple of the Matha viz. Lakkundi Anandatirthacharya effected a compromise. Since Sri Satyavijaya was older in age though younger in āsrama he should be the successor to Sri Satyapurna on Mahasamsthāna. After him Sri Satyavarya should take charge of Mahasamsthāna. This was acceptable to both. As a result of this Satyavarya was renamed as Satyapriya. In the meantime Sri Satyapurna returned from Varanasi. He entered into Vrindavan at Kolpur on the banks of river Krishna in Bijapur district. Both Satyavijaya and Satyapriya jointly performed their Guru's ārādhanā and went on tour in different directions.

Sri Satyavijaya went to Arcot. Krishnājipant, the chieftain of Arcot, received him with great respect and honoured. His brother Venkājipant similarly received the Swamiji at Arani. These two brothers gave a good deal of gold jewellery to the Matha. Sri Satyavijaya wanted a quiet place for him. He selected a place about four miles from Arani on the banks of Kaundinya river. Venkajipant built a palace for himself and a Matha for his Guru adjoining the palace. Sri Satyapurna desired to enter into Vrindavana. As Sri Satyapriya was not close by he placed the mula Rama, the other deities, and all the jewellery of the Matha under the ground. He prepared three lists of Matha property, kept one

with the articles kept under the ground, handed over the second to Venkajipant and sent the third to Sri Satyapriya. He asked Venkajipant to send a messenger to Sri Satyapriyatirtha, get him and hand over Ṃula Rama and all Matha property. He also instructed that until Sri Satyapriya tirtha arrives, naivedya and dipa be offered in front of the place where the Mula Rama and other deities are placed under the ground, and Dvādashastotra be recited.

Sri Satyapriyatirtha arrived after twenty-two days. He was asked to stand before the Vrindavana of Sri Satyavijaya, secure his permission to take charge of the Matha, and assume the charge. These were the instructions of Sri Satyavijaya. However, Sri Satyapriya felt that it was not necessary to take permission. He started returning without taking charge. However, the Hanuman in a temple about a mile from this place on Sri Satyapriya's return route raised his hand and prevented him. Sri Satyapriya realised the divine message, returned to the Vrindāvana of Sri Satyavijaya, offered the prayer 'Bandhustvam Guruh istadaivatam' etc and assumed the charge of Maḥasamsthāna. Venkajipant and other disciples were very happy and paid their respects to Sri Satyapriya.

Sri Satyavijaya was on the peetha of Uttaradimath from 1726 AD to 1737 AD and added to the

greatness of the Matha both in propagating knowledge and enriching the property of the Matha.

Sri Satyaprajnatirtha

Sri Keshavacharya's (Gururaja's) second son Narasimhacharya was a great scholar. He wrote a commentary on Vākyārthachandrika of Sri Vidyādhishatirtha. This was known as Vakyārtharatnamālā. Therefore, this Narasimhacharya became famous as Ratnamālā Narasimhacharya. In his progeny the eighth in succession was Pandurangi Rangācharya. He lived in a village i.e., Kadakol near Savanur in Dharwad district. He married the daughter of Sri Satyadhiratirtha the father of the famous Sri Satyadhyana tirtha.

This Rangacharya had three sons viz., Bhimacharya, Krishnacharya and Jayacharya. These were the sons of the elder sister of Sri Satyadhyānatirtha. Krishnacharya and Jayacharya married the daughters of Sri Satyadhyanatirtha. Thus these were intimately related to the pontiffs of Uttaradimatha. This relation apart, these two brothers were great scholars. Krishnacharya studied Nyāyashāstra under Kapisthalam Desikacharya at Tirupati. He studied Vedanta under Sri Satyadhyānatirtha. He participated in Vākyārtha Sabhas prominently, taught hundreds of students at the Matha. His

scholarship was appreciated at Varanasi, Darbhanga, Kumbhakonam, Srirangam, Mysore and at all centres of learning all over India. However, he died early at the age of fifty only.

His younger brother Jayacharya studied Nyāya and Vedanta under him. He further studied under Sri Satyadhyānatirtha. With this background of scholarship he was entrusted with the task of administration of the Matha as Dewan. He assisted Sri Satyadhyānatirtha in organising Vidwat-sadas, Mahāsamārādhanā and all other academic and religious programmes of the Matha in a big way. Pleased with his scholarship and administrative ability Sri Satyadhyānatirtha gave him sannyasa, named him as Satyaprajna, and made him his successor on the Peetha. Sri Satyaprajna was on the Peetha only for three years. But during this short period he improved the financial position of the Matha, and conducted two ārādhanas of his Guru on a grand scale. He was the third Peethadhipati from the Pandurangi family on the Peetha of Sri Uttaradi Matha. He entered into Vrindavana at Atgur.

In addition to these three Peethadhipatis from Pandurangi family, Sri Satyānanda also hailed from this family. He was given sannyāsa by Sri Satyanidhitirtha. However, he did not become a Peethadhipathi. Three more pontiffs are connected with

Pandurangi family by way of dauhitra santāna, that is to say, their mothers hailed from Pandurangi family. These are Sri Satyanidhitirtha, Sri Satyādhirājatirtha and Sri Satyābhijna tirtha.

There is a strong tradition to say that Sri Padmanabhatirtha, the first disciple of Sri Madhvacharya, has been the ancestor of Pandurangi family. However, at piesent it is traced upto Aandabhattaraka the father of Sri Vidyadhishatirtha. The line of Keshavacharya (Gururaja) is traced to Timmannabhatta the elder brother of Anandabhattāraka. But Keshavacharya was brought up by Anandabhattāraka and as such he is practically considered as the third son of Anandabhatta. Sri Satyavijaya and Sri Satyaprajna belong to the line of Keshavacharya and Timmanabhatta, while Sri Vidyadhisha belongs to Anandabhatta's line.

The decendants of Sri Vidyadhisha and Sri Satyaprajna are found in North Karnataka while the descendants of Sri Satyavijaya are found in Kumbhakonam, Tanjore, Madras etc. places in Tamilnadu.

—K. T. Pandurangi.

श्रीविद्याधीशतीर्थाः

यद्विद्याधीशगुरोः शुश्रूषान्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥

॥ श्री वेदव्यासाय नमः ॥

अणुविद्याधीशविजयः

मङ्गलश्लोकाः

श्रीभूमिदुर्गाग्रिमभागभास्वद्धामा रमालालितपादपद्मः ।
मुक्ताविमुक्तेरणनर्मकर्मा निर्मातु मे शर्म चिरं मुकुन्दः ॥ १ ॥

सद्द्वैतराद्धान्तमयूखधारानिर्वापिताद्वैतमतान्धकारः ।
विकासितार्हद्धृदयारविन्दो दद्यात् प्रबोधं मम मध्वभानुः ॥ २ ॥

उत्तंसभूषामणिरुत्तमानां जागर्तु चित्ते जयतीर्थयोगी ।
अनन्यलभ्यामसुरारिविद् द्राक् सुधामदाद्यः सुमनोजनेभ्यः ॥ ३ ॥

कदापि नापैतु गुरुः स विद्याधीशाभिधानः स्मृतिमार्गतो मे ।
निगृह्य योऽभ्यन्तरवैरिवर्गं वैराग्यसाम्राज्यमुरीचकार ॥ ४ ॥

पुण्यस्तम्भपुरे आनन्दाचार्यः

अस्ति क्षितेर्भूषणमब्धिकन्याविभूषितं भूषितराजमार्गम् ।
सम्भावितं साधुजनेन पुण्यस्तम्भाभिधानं नगरं गरीयः ॥ ५ ॥

ग्रामं तमध्यास्त गदाग्रजाङ्घ्रिसरोरुहध्यानसमाधिधन्यः ।
वासिष्ठगोत्राम्बुधिशीतधामा त्रिविक्रमाचार्य इतीऽऽड्यनामा ॥ ६ ॥

तस्याग्रजातिप्रवरस्य तादृक् पुण्येन गुण्योऽजनि सूनुरेकः ।
यं प्राहुरानन्दितसाधुवृन्दमाचार्यमानन्दपदाद्यमुर्व्याम् ॥ ७ ॥

निसर्गगूढान् जयतीर्थयोगिप्रणीतमध्वागमपञ्चिकार्थान् ।
आश्चर्यमक्लिष्टपदाभिरुर्व्यां यष्टिप्पणीभिः प्रकटीचकार ॥ ८ ॥

अरुन्धतीशक्तिपितुर्यथैवं यथात्रिनाम्नो यमिनोऽनसूया ।
तस्याभवत्तद्वदपङ्कशीला गङ्गेति भार्या गुणवारिराशेः ॥ ९ ॥

जायापती तौ जगदेकनेतुः पादारविन्दार्चनया च भक्त्या ।
सत्यक्षमादानदमार्जवाद्यैः गुणैरभूतां गुरुणापि नन्द्यौ ॥ १० ॥

ज्येष्ठपुत्रः श्रीनिवासाचार्यः

यच्छ्रीनिवासस्य कृपामहिम्ना जातोऽर्भकोऽसौ दिवसे शुभंयौ ।
चक्रे विधिज्ञेन ततश्च पित्रा स श्रीनिवासोचितनामशाली ॥ ११ ॥

द्वितीयपुत्रस्य नरसिंहाचार्यस्य जन्म

तदद्यविद्याविनयादिहृद्यं सून्वन्तरं सुभ्रु यथा भवेन्नः ।
तथा भवार्णोनिधिकर्णधारं श्रीनारसिंहं शरणं व्रजामः ॥ १२ ॥

पुङ्खानुपुङ्खप्रसरत्कटाक्षप्रेङ्खोल्लितापारकृपारसौघः ।
आस्ये मृगेन्द्राकृतिराविरासीत्तदग्रतः कोऽपि पुमानुदग्रः ॥ १३ ॥

प्रसादतो मे परमेष्ठिपूर्वैरप्यर्थनीयाद‌तिमात्रतेजः ।
भविष्यति द्राग् भजनीयमार्यैः आनन्द ते नन्दनरत्नमेकम् ॥ १४ ॥

शुभदग्रहतारयोगरम्ये दिवसेऽथ द्विजवर्यवल्लभा सा ।
सुषुवे तनयं सुधामयूखं दिगिवामर्त्यपतेः सतां हिताय ॥ १५ ॥

नृहरेरनुकम्पयैव लब्धं जनतामान्यमसद्धटामृगेन्द्रम् ।
स विचिन्त्य कृती ततोऽर्थवत्या विदधे नन्दनमाख्यया नृसिंहम् ॥

नरसिंहाचार्यस्य बाल्यं, उपनयनं, विद्याभ्यासः

हरिरित्युपलं निधाय पीठे तुलसीपत्रपयः कृतोपचारः ।
नतिपूर्वमसौ मुदा तदग्रे सवयोभिः सह ताण्डवानि तेने ॥ १७ ॥

गुरुरस्म्यहमेव वोऽखिलानामिति जल्पन् सवयः कुमारवर्गम् ।
उपवेश्य पुरः किमप्युदारं कलभाषी कलयाञ्चकारशास्त्रम् ॥ १८ ॥

ततो दशम्यामहरीशवासरे स रेवतीशाद्यखिलग्रहानघे ।
शुभे मुहूर्ते सुधियां गणैर्वृतो धृतोपवीतं विधिवद्
व्यधात् सुतम् ॥ १९ ॥

पपाठ सप्रश्रयमन्तिके पितुः स मध्वशास्त्राद्यखिलागमानपि ।
तदीयदैनन्दिनहोमकन्दलत्कृशानुपक्वोदनकॢप्तभोजनः ॥ २० ॥

नरसिंहाचार्येण विद्वद्भिः सह वाक्यार्थः

तदा महाभाष्यविशारदावुभावुदारवाचावुरुगर्वधूर्वहौ ।
सदोन्तराले शिवविश्वपण्डितौ वितेनतुर्व्याकरणेषु नैपुणीम् ॥

दृशा स्वतातेन कृतप्रचोदनो विशारदस्तत्र विहस्य बालकः ।
तदुक्तसूत्रार्थमशेषमप्यसावखण्डयद्युक्तिमतीभिरुक्तिभिः ॥ २२ ॥

कृताभ्यसूयस्तदमुष्य भाषितं निशम्य गोलिङ्ग इति द्विजोपरः ।
रुषाधिचिन्तामणिवादचर्चिकां ततान नैयायिकतन्त्रमर्मवित् ॥

१–१४ श्लोकाः प्रथमसर्गादुद्धृताः ।
१५–१८ श्लोकाः द्वितीयसर्गादुद्धृताः ।

जितेषु तेषु त्रिषु तानभट्ट इत्युदूढनाम्ना स पुनर्द्विजन्मना ।
सहातनोच्छ्रीतकलाभिमानिना प्रसङ्गमुद्दामवचोविजृम्भणः ॥

वितानिते तत्र च तानभट्टके नतानने सभ्यजने सविस्मये ।
अनर्घ्यचीराम्बरपारितोषिकं गृहस्थतः प्राप स तातपूर्वकम् ॥

नरसिंहाचार्यस्य विवाहः, पाठप्रवचनम्

स रुक्मिणीतिप्रथिताभिधानया द्विजन्मनाम्नीयकुलस्य कन्यया ।
शुभे वयोरूपगुणानुरूपया व्यधत्त लग्ने गृहमेधिनं सुतम् ॥ २६ ॥

स्वयं ततोऽध्यापयदागमान् गुरोरनुज्ञया मध्वयतीन्द्रनिर्मितान् ।
क्रमेण शिष्यांश्च कुशाग्रधीरयं त्रिविक्रमागारकृतासिकोऽन्वहम् ॥

यदृच्छया तत्र कदाचिदागमप्रवीणभावाधिगताधिकस्मयः ।
समेत्य शिष्यावलिसंवृतं पुरो ददर्श तं कश्चन मायिमस्करी ॥

द्विरष्टसंवत्सरजातिशोभनप्रतीकमाजानुभुजार्गलद्वयम् ।
वदन्तमुच्चैर्वरकर्मनिर्णयप्रगल्भवाक्यार्थविशेषमञ्जसा ॥ २९ ॥

अयं महात्मा खलु कश्चिदन्यथा मनुष्यमात्रस्य नहीदृशी मतिः ।
इति स्वचित्ते विमृशन् हृदैव तं प्रणम्य तूष्णीं प्रययौ यथागतम् ॥

आनन्दाचार्यस्य हरिपदप्राप्तिः

भित्वाद्वैतमतान्धकारमभितः सद्वृन्दसम्भावितः
संमोद्य द्विजसंसदं च वसुभिः दूरीकृतारिव्रजः ।
आशाः पूर्णकलाभिविस्तृतयशोज्योत्स्नाश्रिया शोधयन्
आनन्दद्विजराडगात् हरिपदं यज्वादिभूरूर्जितम् ॥ ३१ ॥

१९-३१ श्लोकाः तृतीयसर्गादुद्धृताः

पुण्यस्तम्भपुरस्य यवनैः आक्रमणं, नासिकनगरं प्रति गमनम्

पापिना यवनभूभुजा क्षितावीश्वरोऽहमिति हन्त जानता।
ग्रामसन्ततिरभूदपार्थिता सङ्करेण निगमावलिर्यथा ॥ ३२ ॥

तामवन्पथि स भूमिभृद्धृतिः गौतमीप्रथितमातृकालयम् ।
प्राप नीपपरिशोभि नासिकाऽयम्बकाख्यनगरं मनोहरम् ॥ ३३ ॥

शेखरीकृतरमाघ्रिभूपदाप्लावपावनधुनीपयोभरम् ।
तं प्रणम्य शिवमादरादसौ तत्र वासमतनोच्छरद्द्वयम् ॥ ३४ ॥

नागनाथसुतदत्तपण्डितस्य आह्वानेन सङ्गमनेरपुरागमनम्

तत्पुरे स्थितमथाकलय्य तं नागनाथसुतदत्तपण्डितः ।
सङ्गमोपपदनीरनामकग्राममानयदुदञ्चितोत्सवः ॥ ३५ ॥

इत्यनर्घ्यतरभूषणादिकं दत्तवन्तमथ दत्तपण्डितम् ।
सोऽभिनन्द्य सुजनावलीवृतः पैठणीपुरमगादगाधहृत् ॥ ३६ ॥

तत्र साधुरचिते मठान्तरे चित्रवाक्यरचितानतिविस्मितान् ।
सत्रपांश्च रचयन् स वादिनः सूत्रभाष्यमवदत् सुधीजने ॥ ३७ ॥

नरसिंहाचार्यस्य पाण्डुरङ्गपुरं प्रति आगमनम्

वत्सरार्धमुषितः स तत्पुरे भर्त्सिताखिलविपक्षरौहिषः ।
मेरुकन्दरमिवाथ केसरी पाण्डुरङ्गमगमत् बुधाश्रयम् ॥ ३८ ॥

प्रत्यहं प्रणतिपूर्वकैस्तवैरित्यनन्यमनसाऽमुना हरिः ।
तोषितोऽभवदुदारशीलतोऽशेषदेशविदुषामपि व्रजः ॥ ३९ ॥

मध्वयोगिचरणाब्जमार्दवाभिज्ञभूतलतयातिपावनम् ।
प्राक्तनं मठमसावकारयत्तत्र नूत्नमिव चित्रदारुभिः ॥ ४० ॥

वादतः सदसि दुर्जनोऽमुना निर्जितः स विजयापुरासिकम् ।
लिङ्गयाख्यमभजत् द्विजं भिया गूढमाहितपलायनो निशि ॥ ४१ ॥

नरसिंहाचार्यस्य विजयापुरं प्रति आगमनम्

वैष्णवाग्रिममम् सशिष्यकं प्रेषितासजनवाहनादिकः ।
आनिनाय विजयापुरं मुदा लक्ष्मपण्डितवरो यदृच्छया ॥ ४२ ॥

तत्सभाजितममुं सदग्रिमं प्राग्जितोऽपि परिचारकान्वयः ।
अभ्यधत्त नरसोऽभ्यसूयया जृम्भिताग्रहनिराकृतत्रपः ॥ ४३ ॥

केन सृष्टमखिलं चराचरं केन वा प्रतिदिनं प्रबोधवत् ।
ब्रह्म केन समुपैति सज्जनो वेत्सि चेदिह वदैकमुत्तरम् ॥ ४४ ॥

कद्वद शृणु समीरितं त्वया केन वेति विषयत्रयेऽपि यत् ।
किं तदेव पदमत्र नोत्तरं वागधीशमरुदर्कवाचकम् ॥ ४५ ॥

तत्रामात्यघटा समर्पितमहाभूषाम्बरान्दोलिका
श्वेतच्छत्रतुरङ्गचामरमुखश्रीसारलब्धोन्नतिः ।
वेदव्यासगुरुप्रमोदकलनानिस्तन्द्रशीलः क्षितौ
विद्याकर्मतनूभवैरयमभून्निर्जित्य लोकत्रयम् ॥ ४६ ॥

३२–४६ श्लोकाः चतुर्थसर्गादुद्धृताः ।

इत्थं दिगन्तरनिरूढयशोऽङ्कुरं त-
मासेवितं गुणवदञ्जलिमञ्जरीभिः ।
आकर्ण्य संमदवशात् प्रजिघाय वेद-
व्यासाभिधानगुरुरस्य कृतेऽम्बराणि ॥ ४७ ॥

नरसिंहाचार्यस्य मण्णूरु ग्रामं प्रति आगमनम्

दैवात्ततो मणिपुरं समुपेत्य योगि-
चन्द्रे दृशां नयननन्दथुमादधाने ।
तद्दर्शनोत्सुकतया तदगादयं द्राक्
चेतोऽपि सर्वविदुषां प्रमदातिरेकः ॥ ४८ ॥

श्रीमध्वयोगिमतरक्षणराज्यभार-
माधाय वत्स भवति प्रकटानुभावे ।
चेतःश्रमं मम चिराय निनीषतीति
व्याचष्ट संसदि नृसिंहममुं यतीन्द्रः ॥ ४९ ॥

नरसिंहाचार्यस्य श्रीविद्याधीशनाम्ना श्रीमदुत्तरादिमठपीठे अभिषेकः

लग्ने शुभे तदनु तस्य विधाय विद्या-
धीशाभिधानमभिहृद्य गुणानुरूपम् ।
भूमावशेषसदनुग्रहयौवराज्य-
पट्टाभिषिक्तमपि तं गुरुराडतानीत् ॥ ५० ॥

इक्ष्वाकुवंशजनुषः प्रतिमां मुरारेः
द्वैपायनस्य च पुरातनपुण्यलभ्यान् ।

बिम्बानपूजयदसौ गुरुशासनेन
श्रीशोऽपि तुष्टिमभजत्तदुपासनेन ॥ ५१ ॥

जयतु जयतु साधुक्षेमकार्यात्तदीक्षः
जयतु जयतु कारुण्यापगाश्चत्कटाक्षः ।
जयतु जयतु तादृक्सद्गुणस्तोमसान्द्रः
जयतु जयतु विद्याधीशयोगीन्द्रचन्द्रः ॥ ५२ ॥

श्रीविद्याधीशस्य सङ्कलिकाकरवीरपुरादिक्षेत्रसञ्चारः

अथ सङ्कलिकामसौ पुरीमधिरूढाग्रिमदन्तिधोरणः ।
धवलाब्जगभीरघुंघुमध्वनिसञ्छिन्नदिगन्तरो ययौ ॥ ५३ ॥

अभिगम्य पदाम्बुजानतैः कृतिभिः तत्र यतीन्दुरञ्चितः ।
नियमादवसत् वराश्रमप्रथमं मासचतुष्टयं मुदा ॥ ५४ ॥

करवीरपुरीमितस्ततो मघवन्मुख्यमरुद्भिरादृते ।
स्फुटपञ्चसरित्समागमे पटुधीराप्लवकर्म निर्ममे ॥ ५५ ॥

बहुपुण्यसरित्सु मज्जनं कलयन् सज्जनकामितार्थदः ।
करहाटमगात् स नीवृतं श्रितकृष्णासरिदूर्मिमारुतम् ॥ ५६ ॥

क्वचनोपनिषद्विजृम्भणैः क्वचिदाम्नायपदक्रमेरणैः ।
क्वचिदूर्जिततर्कविद्यया कुहचित् पाणिनिसूत्रचर्चया ॥ ५७ ॥

४७–५२ श्लोकाः पञ्चमसर्गादुद्धृताः ।

बृहदद्रिपुरीं गरीयसीं गुरुणा साकमथायमीयिवान् ।
निगमागमविद्भिरञ्चितामगमत् वेङ्कटनाथसंसदम् ॥ ५८ ॥

धरिणीपरिणीरमुष्य धीसुगुणग्रामसमग्रनन्दथुः ।
सुलभेक्षुरसालशालिकाचणकां ग्रामचतुष्टयीमदात् ॥ ५९ ॥

श्रीविद्याधीशस्य दक्षिणभारतसञ्चारः

स दिशं गुरुशासनात्ततः कलशीनन्दनकल्पिताश्रयाम् ।
अगमत् पथि राजमण्डलीमुकुटीलालितपादपङ्कजः ॥ ६० ॥

सलिलाकरसेतुमाव्रजन् कपिसेनाकरनैपुणीवदम् ।
विहितस्नपनो विभुः सतामनमत्तत्र च रामनामकम् ॥ ६१ ॥

पथि पाण्ड्यमहीपतिं शिवागममर्मज्ञतया दुराग्रहम् ।
स चरन् सुचिरं यदृच्छयावृतपाषण्डगणं व्यलोकयत् ॥ ६२ ॥

निजपूर्णसुखेतिपद्यगं बहुधार्थश्रुतिसिद्धमीरयन् ।
अतिविस्मितचेतसस्ततोऽप्यभजच्छायमनूनमाननाम् ॥ ६३ ॥

कृतभूमिभृदाश्रयं क्वचित् पथि कालज्ञमपार्थभाषिणम् ।
वरमानसगोचरैर्वचोविभवैरेष जिगाय हंसराट् ॥ ६४ ॥

श्रीविद्याधीशस्य रजतपीठपुरं प्रति आगमनम्

अखिलान्यमताब्धिमन्थनात् जनितां दक्षिणदिग्जयश्रियम् ।
हरयेऽर्पयितुं कुतूहली स पुरं राजतपीठमासदत् ॥ ६५ ॥

तुलसीदलकोटिभिर्मुदा कलशे सम्भृतपावनाम्बुभिः ।
विधिवत् शुचिरेषविग्रहं यतिराडर्चिचदच्युतास्पदम्   ॥ ६६ ॥

श्रीविद्याधीशस्य इक्केरिपुरगमनम्

निजपूजनतुष्टनीरधिप्रभवेशात्तकृपास्त्रगञ्चितः ।
स तपोनिधिराडुपैत्ततः परमिक्केरिरितीरितं पुरम्   ॥ ६७ ॥

महिपेन स मानितोऽन्वहं श्रवणागन्तुकितात्मकीर्तिना ।
मुदमारचयन्मनीषिणां न्यवसत्तत्र दिनानि कानिचित्   ॥ ६८ ॥

दनुजोऽवनिदेववेषभृत् प्रथमः कश्चन वेदविद्विषाम् ।
अजनिष्ट विशिष्टदूषको भुवि रङ्गोजिरिति प्रतीतिभाक्   ॥ ६९ ॥

अधिभागवतं प्रपञ्चयत्यधमे श्रीधरवाक्यमार्गणान् ।
विजयध्वजपञ्चिकासिना महता खण्डयदेष मौनिराट्   ॥ ७० ॥

पुनरुद्गिरति स्फुरत्प्रभाकरसिद्धान्तमहास्त्रमल्पके ।
सरसं स्वयमस्त्रमाददे यतिराजो घनतर्कताण्डवम्   ॥ ७१ ॥

अथ जातु खले प्रयागभुव्यपवर्गोऽसुमुचामितीरिणि ।
अपरोक्षचिदेव हेतुरित्यवदत् संसदि तं सदग्रणीः   ॥ ७२ ॥

इति तत्र यतीन्द्रमायिनोर्लिखितान्योन्यविचित्रपत्रिकम् ।
व्यगलत् प्रसभं विवादिनोर्बत मासत्रितयं दिनोपमम्   ॥ ७३ ॥

इत्थं रङ्गाभिख्यमाख्यातकीर्तिः
निर्जित्य द्राक् सौगतैर्बद्धसौख्यम् ।

प्रातर्धन्योऽपूजि राजन्यमुख्यैः
संख्यावद्भिः सौख्यतीर्थार्यशिष्यः ॥ ७४ ॥

पुनरपि कृतमुङ्गीग्रामगूढप्रचारम्
नरपति भटकृत्ताकर्षणं पादनम्रम् ।
यतिपतिरनुकम्पाक्लिन्नचित्तोऽत्यजत्तम्
सपदि गलितमानः सोऽपि तं देशमेव ॥ ७५ ॥

वादीन्द्रनाम यतिरेत्य दुराग्रहेण
तं जातु कश्चन जगद्गुरुसार्वभौमम् ।
वादे जितः प्रबलभीतिहयाधिरूढः
सादीन्द्र एव भवति स्म पलायमानः ॥ ७६ ॥

श्रीविद्याधीशस्य सन्ध्यावलीग्रामं प्रति आगमनम्

ततः सन्ध्यावली नाम ग्राममाप यतीश्वरः ।
रथ्याखेलद्भीमरथ्या लोलकल्लोलमारुतम् ॥ ७७ ॥

ततस्तेन श्रुतिस्तेनगर्वसर्वस्वनाशिना ।
समटाकि सुधीवाटीरमणीयं मणीपुरम् ॥ ७८ ॥

तत्र छात्रालिभिः सत्रा द्वित्रान् घस्रानयं नयन् ।
उरुभूभृत्पुरीमर्षीत् परभूभृद्दुरासदम् ॥ ७९ ॥

श्रीवेदव्यासतीर्थस्य हरिपदप्राप्तिः

परस्परोत्कण्ठमानमनसोः प्रसमीक्षणे ।
तयोः समेतयोरासीत् तत्क्षणो महितक्षणः ॥ ८० ॥

५३-७६ श्लोकाः षष्ठसर्गादुद्धृताः ।

चैत्रकार्जुनपक्षीयद्वितीयायां पदाम्बुजम् ।
हार्षीकेशमसावार्षीत् वेदव्यासगुरूत्तमः ॥ ८१ ॥

विमनाः स मनाग् भूयो बोधलब्धधृतिस्सदा ।
तुर्याश्रमोचितं तस्य कार्यमार्यैरचीकरत् ॥ ८२ ॥

स्वर्णानि षट्द्वादशाष्टौ तन्मुखाब्जाद् द्विजोत्तमाः ।
परं न प्रापुरेकैके तत्कराम्भोरुहादपि ॥ ८३ ॥

अयं सहस्रदीनारान् पञ्च पञ्चायुधाप्रियः ।
प्रादाद् मोदात् द्विजातिभ्यः दिङ्मुखेभ्योऽमितं यशः ॥ ८४ ॥

द्वित्रानसौ वसन्मासान् तत्रानेकबुधावृतः ।
श्रीजानेरकरोद् भक्त्या पूजामाजानपावनः ॥ ८५ ॥

श्रीविद्याधीशस्य रजतपीठपुरीं प्रति आगमनम्

यतीन्दोः प्रागग्रजन्मतनयो विनयोज्वलः ।
केशवाचार्यनामाभूत् श्रीशाराधनपेशलः ॥ ८६ ॥

तदासामान्यकारुण्यपात्रं चित्रचरित्रभूः ।
विज्ञाताखिलशास्त्रार्थः प्रज्ञावन्मौलिभूषणम् ॥ ८७ ॥

स्तावं स्तावमिति प्रेम्णा स्मारं स्मारं गुरुं स्वकम् ।
सुधिया नन्दितस्तेन रौप्यपीठमथागमत् ॥ ८८ ॥

तत्र श्रीकृष्णसेवायां निष्णातधिषणो यतिः ।
अवसच्चतुरो मासान् चतुरो मतरक्षणे ॥ ८९ ॥

तेवनेन चरामीति सङ्कल्प्य प्रीतये हरेः ।
तत्याज तत्र शिबिकां चामरे चामरेडितः ॥ ९० ॥

पीतवासोभृतं देवमवलम्ब्य सदा हृदि ।
विनालमल्लकादन्यद्वासो नाधत्त वित्तमः ॥ ९१ ॥

मठीयविदुषां स्थाने पृथक् पाककृतामसौ ।
द्वित्राणामचरद्भिक्षां शिक्षाकृद्यतिनामिव ॥ ९२ ॥

हरिपादार्पितैर्नित्यं तुलसीदलमात्रकैः ।
उपदंशवदन्धाश्नन्निन्धे स्म यतिसिन्धुरः ॥ ९३ ॥

प्रतिसन्ध्यं व्यधाद्विष्णोरष्टोत्तरशतं नतीः ।
ततोऽपि द्विगुणीभूतप्रदक्षिणपुरस्सरम् ॥ ९४ ॥

रजतपीठपुरे सुधाव्याख्यानविरचनम्

स सुधाविवृतिं तेने वसुधावलयेद्भुताम् ।
न सुधामप्याद्रियन्ते सन्तो यत्पाननिर्वृताः ॥ ९५ ॥

निर्विशेषं गुणैः स्वीयैः वेदनिध्याख्ययोगिनम् ।
प्राहिणोत् दिक्षु लक्ष्मीशद्वेषिणो जेतुमुन्मनाः ॥ ९६ ॥

श्रीविद्याधीशस्य गोदावरीप्रदक्षिणा

ततः स्वयं नासिकाद्यत्र्यम्बकाचलमेयिवान् ।
यत्र गोदांतटिन्यासीज्जटाटीरजटोदिता ॥ ९७ ॥

प्रदक्षिणीचकारासौ तामतामसवृत्तिभिः ।
सुधीभिः शतसंख्याकैः सत्रा वित्रासयन् खलान् ॥ ९८ ॥

अंसे वहन् रघूत्तंसप्रतिमामतिमानुषः ।
विनतानन्दनो रेजे चरित्रैः पक्षिराडिव ॥ ९९ ॥

विद्राव्य यतिसिंहोन्यक्षुद्रानेकपयूथपान् ।
भद्राचलमितो रामभद्राय नतिमातनोत् ॥ १०० ॥

कोनसीमामसौ प्राप मानसी मापतेरिव ।
विभाति सृष्टिर्या विद्वत्सभातिशयशोभिता ॥ १०१ ॥

सोन्तर्वेदिमगादन्तर्वाणि श्रोणिभिरावृतः ।
वासिष्ठगोदास्वप्रेष्ठसङ्गसाङ्केतिकस्थलीम् ॥ १०२ ॥

लवणोदस्य कच्छेषु यान्यम्बूनि निसर्गतः ।
कीटान्यपि स्वदन्ते स्म महिम्नैव यतीशतुः ॥ १०३ ॥

निरीय स गरीयस्याः गोदायाः सप्तधाम्बुधिम् ।
प्रविशन्त्याः ततस्तेने पारकाङ्क्षी प्रदक्षिणम् ॥ १०४ ॥

आगत्य धर्मनगरीं नृहरीन्द्रमुच्चैः
आनम्य सम्यगधिगत्य कृपां तदीयाम् ।
स त्र्यबकाचलमवाप भवापहोद्य-
द्विज्ञानशेवाधितृणीकृतलौकिकार्थः ॥ १०५ ॥

श्रीविद्याधीशस्य–चोलदेशे सञ्चारः

अथ जातुचित् सदसि संयमिनाम्
अवतंसभूषणमणिः कृतिनः ।

७७–१०५ श्लोकाः सप्तमसर्गादुद्धृताः ।

अवलोक्य केशवसुधीप्रमुखान्
अवदत् सुधारसकिरां स गिरम् ॥ १०६ ॥

बहुशः किलान्ध्रविषयेषु परे
विदुषो द्विषः श्रुतितते: समदाः ।
विजिता भवद्भिरजितोऽपि चिरात्
परितोषितो दशमनीषिपतिः ॥ १०७ ॥

अधिचोलदेशमधिकस्मयभाक्
निगमागमार्थनिपुणः कृतिमान् ।
निकरोऽस्मदीयमतभेदकरः
वसतीति नः श्रुतमसत्प्रथमः ॥ १०८ ॥

तदखर्वगर्वधुतिपूर्वमही-
श्वरशैलरङ्ग नगरादिजुषः ।
कमलाधिनेतुरवलोकनतः
कलयाम नः फलि दशोर्जननम् ॥ १०९ ॥

अगणेयपुस्तकसमग्रभरः
स्तिमितावलोलगलकम्बलकः ।
समुदग्रश्रृङ्गशिखरः प्रययौ
तरसोत्कटस्तदनु भद्रगणः ॥ ११० ॥

शनकैस्ततः कतिपयैर्दिवसैः
अधिगत्यवेङ्कटगिरीन्द्रपतिम् ।

नतिमारचय्य यतिराट् पुरतो
बहुधा नुनाव विबुधालिनुतम् ॥ १११ ॥

पथिकालहस्तिनगराधिपतिम्
प्रणमय्य काञ्च्यभिधयोल्लसिताम् ।
नगरीमवाप नगरीतिकनद्-
घनगोपुरामनुगतः सुजनैः ॥ ११२ ॥

घननारिकेलपनसक्रमुका-
मलकाम्रभासिनि तदीयतटे ।
पृतनां निवेश्य सहितासजनः
वररङ्गनामपुरमाप गुरुः ॥ ११३ ॥

तमुपागतं समुपकर्ण्य मुदा
त्रिशिरः पुरात् तिरुमलः क्षितिपः ।
अभिगम्य तत्र चतुरङ्गचमू-
सहितोऽनमत् सकलराजनुतम् ॥ ११४ ॥

स्वगुरोः शुभंयुनि दिनेऽथ गुरुः
स तदन्तरासिकरमेशमुदे ।
धरणीसुपर्वविसरान् सुघृत-
प्लुतमन्नमारभत भोजयितुम् ॥ ११५ ॥

इत्थं दिनत्रयमसौ यतिसार्वभौमो
भूमीसुरान् रुचिरमष्टसहस्रसंख्यान् ।

मृष्टान्नमन्वहमभोजयदादरेण
विश्वम्भरोऽप्यधित तृप्तिमदोऽन्तरस्थः ॥ ११६ ॥

हस्ताम्बुजे मकरकच्छपपद्मशङ्खान्
रेखाच्छलेन स वहन् हृदये मुकुन्दम् ।
त्रिंशत् सहस्रगणितान् व्यदिशत् द्विजानाम्
दीनारकानिति यदत्र किमद्भुतं तत् ॥ ११७ ॥

श्रीरङ्गात् स निरीय तञ्जनगरीरम्योपवन्यामितः
तत्रत्यैः रघुनाथपार्थिवमुखैरभ्यर्चितः सादरम् ।
सम्भाव्याथ सुधीन्द्रयोगितिलकं श्रीकुम्भकोणादिक-
ग्रामेष्वानमदिन्दिराप्रणयिनं मोदेन नाणीयसा ॥ ११८ ॥

तदनन्तरं तनुभृतां गुरूत्तमो
हितमाचरन् विहितकार्यधूर्वहः ।
मधुरामवाप मधुरां स सम्पदा
मधुभित्पदाब्जमधुनाभृताशयः ॥ ११९ ॥

तटिनीमितस्तदनु ताम्रपर्णिकां
न दिशां मुखानि स यशोभिरात्मनः ।
अकरोदलं परमशेषधीमता-
मपि तद्भवैरमलमौक्तिकोत्करैः ॥ १२० ॥

अथ सेतुबन्धमतिबन्धुरोल्लसत्-
कपिबाहुसन्धितमघेन्धनानलम् ।

१०६-११८ श्लोकाः अष्टमसर्गादुद्धृताः ।

अधिगत्य सिन्धुसलिले कृताप्लवः
स बबन्ध तत्र रघुसिन्धुरे मतिम् ॥ १२१ ॥

धर्मपुर्यां श्रीविद्याधीशस्य दिनचर्यावर्णनम्

बदरीं क्रमेण निबरीशसिन्धुजा-
हितसन्निधानमहितां जगद्गुरुः ।
ववले यियासुरखिलैः सुधीजनै-
रपि धर्मनामनगरीं गरीयसीम् ॥ १२२ ॥

अवकर्ण्य कर्णमधुरां तदागतिं
वरपूर्णबोधबुधपूर्वसूरयः ।
अभिजग्मुरञ्चितमुदस्तमादरा-
दपि वासुदेवयतिराट् पुरस्सराः ॥ १२३ ॥

विविधानि तस्य च विरागितावनेः
चरितान्यनन्यसुकराण्यहर्दिवम् ।
भुवि के प्रजल्पितुमिहेशते तथा-
प्यहमीरयामि चपलो यथामति ॥ १२४ ॥

उषसि प्रशस्तमुभयोर्द्विजन्मनो-
र्मुखतोऽवधारितमुरार्दनश्रुतिः ।
स समुत्थितोऽथ ववृतेऽन्तरे बहि-
र्द्विविधेन शौचविधिना समुज्ज्वलः ॥ १२५ ॥

महितां तदङ्घ्रिकरमर्दितोज्झितां
मृदमाकलय्य वपुषि स्वयं जनाः ।
क्षयकुष्ठकोष्ठगददुर्दमग्रहैः
सहसोज्झिताश्च सुखिनोऽभवन्नहो ॥ १२६ ॥

करदीपिकालिकलिताध्वना शनैः
नियमीन्दुरेत्य नियमप्रमाथिनि ।
विशदे ममज्ज विधिवत् स गौतमी-
पयसि द्युसिन्धुपयसीभराडिव ॥ १२७ ॥

मुनिराट् कृताचमनमुख्यसत्क्रिया
दिवि भानुबिम्बभुवि भावयन् हरिम् ।
शनकैर्जजाप जनकैरवेशिता
प्रणवं महाघगणवञ्चकं मुहुः ॥ १२८ ॥

सुचिरं यतीन्दुरिह रामसूरिणा
श्रवणावतंसकृतशार्ङ्गभृत्कथः ।
प्रचचाल वेत्रकरवारिताग्रतो
जनताविमर्दविशदीकृतायनः ॥ १२९ ॥

स मठे ततो रघुपतेर्दृढव्रतो
बहुधाप्रदक्षिणविधानमाचरन् ।
प्रमदेन साष्टशतसङ्ख्यया नती-
रतनोच्च माङ्गलिकदीपिकार्पणम् ॥ १३० ॥

अधिसंसदञ्चति कुशासनं यति-
प्रवरेऽथ वेदनिधियोगिपूर्वकाः ।
अपि केशवार्यबुध सत्यपूर्वक-
व्रतयोगि नारणविपश्चिदाह्वयाः ॥ १३१ ॥

यदुपत्यनन्त नरसिंहरोट्टिवेङ्कट
भीमरामहरि धर्मसूरयः ।
बहवः प्रणम्य सुधियस्तथेतरे
विनयात्तदोपविविशुर्यथाक्रमम् ॥ १३२ ॥

सह तैः सुधाब्धिरचितावगाहनः
प्रहरद्वयेऽप्यतियतिं प्रभुः सताम् ।
अवगाह्य सिन्धुसलिलेऽथ पूर्वव-
द्धरिमारराधयिषति स्म सादरम् ॥ १३३ ॥

विपुलप्रभालिविवृताञ्चलस्फुरन्न-
वरत्नदीप्तिनटदिन्द्रकार्मुके ।
रमणीयविष्टरतले रघूत्तम-
प्रतिमां तपोनिधिरभिन्यवीविशत् ॥ १३४ ॥

वरधूपदीपमुकुरप्रकीर्णक-
व्यजनार्पणादिविभवैः परिक्रमैः ।
नतिभिः प्रशस्तनुतिभिः प्रसेदिवा-
नमुना व्यधायि किमु नाजभूसुतः ॥ १३५ ॥

इह भैक्ष्यकत्रितयमात्रमाचरन्
विनिवेद्य देवविमताहिताय तत्।
अधिपङ्क्ति भक्तमतिमृष्टमश्नतां
बुभुजेऽन्नसाधनितभारतीदलः ॥ १३६ ॥

अथ सायमाप्लवनपूर्वकर्मकृ-
द्धरयेऽर्पितानतिशतः स दीपिकाम्।
परिकल्प्य संसदि समासदत् वृषी-
मुरीकृताखिलविपश्चिदानतिः ॥ १३७ ॥

स्तावं स्तावमसौ गुणान्निजगुरोः साकं सुधीतल्लजैः
नीत्वा च प्रहरद्वयं निशि ततः कृतागमालोकनः।
सर्वांस्ताननुमान्य मान्यचरितः तत्तद्गृहावाप्तये
शेते दर्भकटे स्वयं स मनसा ध्यायन् भुजङ्गेशयम् ॥ १३८ ॥

शर्माभियोगाय च सज्जनानां
शर्मेतरार्थाय च दुर्जनानाम्।
अध्वन्निवासं जगतां त्रयाणा-
मुवास मासांश्चतुरः स योगी ॥ १३९ ॥

पुरि ते परितो विमृग्य यत्नात्
चिरमद्राक्षुरुपेत्य कामदेवम्।
तमदभ्रभयेन रामभद्रा-
श्रमिभिक्षोः गृहकुक्षिमत्यजन्तम् ॥ १४० ॥

स विहाय धर्मनगरीमधिक्षपं
यतिराजमान्त्रिकभयाकुलाशयः ।
द्रवति स्म सत्वरमलक्षितो
जनैरपि कामदेवखलदर्दमग्रहः ॥ १४१ ॥

विधाय लोके विविधोक्तिजालैः
मुधा मतान्येव मुहुः परेषाम् ।
व्यधान्मनाः वारणसीप्रयाणे
सुधारसास्वादसुखैकभूमिः ॥ १४२ ॥

श्रीविद्याधीशस्य उत्तरभारतसञ्चारः

तत्रैव वेदनिधियोगिनि मूल-
रामचन्द्राकृतिं च विनिधाय बुधाननेकान् ।
आप्तैः समं सपदि वृद्धसुरस्रवन्तीं
तीर्त्वा धनेशहरितं यतिराट् प्रतस्थे ॥ १४३ ॥

ततः स रेवां समतीत्य मार्गे
प्रयागमेत्य प्रयतान्तरङ्गः ।
कृतत्रिवेणी सलिलेऽवगाह्य
चक्रेऽर्चनं चक्रभृतो यतीन्दुः ॥ १४४ ॥

उमाधवं विश्वपतिं स बिन्दुर-
माधवं च प्रणिपत्य तत्र ।

१३९-१४३ श्लोकाः दशमसर्गादुद्धृताः ।

उवास मासं वरमध्वशास्त्र-
व्याख्यासमाख्यापितबुद्धिसारः ॥ १४५ ॥

ब्रह्मेन्द्रनामा यतिभूमिकाप्ति
प्रच्छादितप्राग्जनिदैत्यभावः ।
सोऽभूद्दः साधुगुणाभितप्त-
नाराचधाराप्रविदीर्णकर्णः ॥ १४६ ॥

अदोन्तिकं प्रेषयदागमेषु
प्रौढान् स मूढः कतिचित् सगर्वान् ।
विपश्चितस्तेऽपि समेत्य तान्ह-
व्याख्यां गुरोः शुश्रुवुरादरेण ॥ १४७ ॥

स्वयत्नवैफल्यकृताभ्यसूयो
ब्रह्मेन्द्रदण्डी बहुलार्थदानैः ।
जिघांसयेव प्रजिघाय योधान्
म्लेच्छान् महेच्छस्य समीपमस्य ॥ १४८ ॥

उदायुधास्ते व्यगमन्न यावत्
तावद्धरेः प्रेरणैव धीरः ।
साकं स्वकीयैः सुजनैः सुखेन
गयामयासीन्नियमिप्रवेकः ॥ १४९ ॥

स तत्र हर्यर्चनमारचय्य
तीर्थेन सार्थीकुरुते स लोकान् ।

यद्बिन्दुसंसर्गवशादनार्द्रा-
प्येधोवृतिः पल्लविनीबभूव ॥ १५० ॥

अलोकसामान्यमहानुभाव-
निर्वर्णनेनास्य नितान्तनम्रः ।
गयावलीसंज्ञितविप्रवर्गो
विश्वोप्यतोऽगाहत विष्णुदीक्षाम् ॥ १५१ ॥

वृन्दावनं गोकुलमाकुलानि
कुर्वन् मनांसि द्विषतां मुकुन्दम् ।
असौ कुरुक्षेत्रमपीक्षतेऽस्य
मध्ये सरण्या मधुरामयोध्याम् ॥ १५२ ॥

महान्ति कृच्छ्राणि विधूय मार्गे
स योगिचन्द्रो बदरीमयासीत् ।
निरस्तनिस्तन्द्रतमस्ततिर्द्राक्
पूषेव पूर्वाद्रितटीं प्रभाते ॥ १५३ ॥

स तत्र नारायणमादिदेवं
नत्वा नरंचानतपारिजातम् ।
स्तवैः प्रशस्तैः स्तवनीयरूपौ
तुष्टाव तुष्टावतिमग्नचेताः ॥ १५४ ॥

श्रीविद्याधीशस्य वृन्दावनप्रवेशः

ततो निवृत्तो गुरुरेकचक्र-
पुरीं परीताखिलसज्जनालिः ।

कलिन्दसीताचलकन्यकोद्य-
द्वेण्यन्तरे प्राप विभासमानाम् ॥ १५५ ॥

योगेन तत्रात्मतनुं जिहीर्षुः
र्वगाह्य गङ्गासलिलं स जातु ।
आराध्य साक्षादरविन्दनाभ-
मभोजयत् ब्रह्मकुलानि नूनम् ॥ १५६ ॥

सम्भावयन् केशवरामधीमत्-
पुरस्सरान् भूमिसुरान् पुरस्तात् ।
कृपार्द्रदृष्ट्या कलितावलोकः
सस्मेरवक्त्रेन्दुरिदं जगाद ॥ १५७ ॥

रामाकृतिं दिग्विजयाभिरामां
प्रगृह्य चेतः प्रतियात यूयम् ।
जनेऽत्र यद्गौरवमाहितं वः
तदेव वेदाद्यनिधौ विधेयम् ॥ १५८ ॥

प्रातःप्रजाधीश्वरहायनोद्यत्-
सहस्यमासासितभूतघस्रे ।
विश्वैकहृद्याचरितः स विद्या-
धीशो रमाधीशपदाब्जमार्षीत् ॥ १५९ ॥

वृन्दारकद्वीपवतीतटे तद्
वृन्दावनं नन्दितसाधुवृन्दम् ।

वृन्दारुमन्दारमहीजशैली-
मविन्दतामन्दबलिप्रदीपम् ॥ १६० ॥

अदोवियोगाददतिदीर्घदीर्घ-
मतीत्य पन्थानममीक्रमेण ।
मासैरनेकैरपि धर्मपुर्याः
समीपमायुः समुदीर्णखेदाः ॥ १६१ ॥

श्रुत्वा गुरुं तादृगवस्थमेतान्
विना तमेतानपनीतधैर्यः ।
पपात शाखीव पटिष्ठवात-
विपाटितो वेदनिधीन्द्रयोगी ॥ १६२ ॥

ततो मठे तत्क्षणमेव मूल-
रामस्य पार्श्वे रमणीयमेनम् ।
विधाय पूजाविधिमादरेण
चक्रे स वक्रेतरचित्तवृत्तिः ॥ १६३ ॥

ये शृण्वन्ति गृणन्ति ये प्रतिदिनं चित्रं चरित्रं गुरोः
एतत्पुस्तकमस्तकल्मषभरं यैरर्च्यते स्वालये ।
तेषामेव हरिर्गुरूत्तमहृदम्भोजप्रकृतासिकः
तुष्टः स्पष्टतरं ददाति च चतुर्वर्गं निसर्गोज्ज्वलम् ॥ १६४ ॥

इति श्रीजनार्दनसूरिविरचित श्रीविद्याधीशविजयमहाकाव्यसारसङ्ग्रहरूपः
पाण्डुरङ्गितमणाचार्यसूनु कृष्णाचार्येण सङ्गृहीतः
अणुविद्याधीशविजयः समाप्तः ॥

१४४–१६३ श्लोकाः एकादशसर्गादुद्धृताः ।

श्रीपूर्णबोधगुरुवंशकथाकल्पतरौ

श्रीविद्याधीशचरितम्

मङ्गलश्लोकाः

प्रणम्य चरणद्वन्द्वं बादरायणमध्वयोः ।
जगद्गुर्वन्वयकथां तत्प्रीत्यै कीर्तयाम्यहम् ॥ १ ॥

अथ विद्याधीशतीर्थमाहात्म्यं लोकविश्रुतम् ।
श्रीविद्याधीशविजये वर्णितं पूर्वमेव हि ॥ २ ॥

लिखित्वा स्थापितं पूर्वं मठे प्राकृतभाषया ।
तत्सर्वमवलोक्याहं सङ्क्षिप्य परिकीर्तये ॥ ३ ॥

श्रीविद्यापतितीर्थस्य सन्न्यासाश्रमदानम्

ततो वेदव्यासतीर्थाः स्वीयं शिष्यं पुरातनम् ।
समाहूय ददुस्तस्मै सन्न्यासं विधिपूर्वकम् ॥ ४ ॥

तस्मै विद्यापतिरिति नाम दत्त्वा गुरूत्तमाः ।
अणुसंस्थानमपि ते ददुः प्रीतिपुरस्सरम् ॥ ५ ॥

महापाण्डित्यसम्पन्नाः चक्रुः दिग्विजयं बहु ।
तदा वेदव्यासतीर्थस्वप्ने श्रीमद्रघूत्तमाः ॥ ६ ॥

सम्बोधयित्वा प्रोचुः तान् वेदव्यासमुनीश्वरान् ।
भो भोः श्रुण्वन्त्वस्मदीयवाक्यं विद्यापतिस्त्वयम् ॥ ७ ॥

चिरस्थायी न भवति विद्याधीशं परं कुरु ।
एवं स्वप्ने गुरुवचः श्रुत्वोत्थाय गुरूत्तमाः ॥ ८ ॥

पाण्डुरङ्गी नरसिंहाचार्याय श्रीविद्याधीश इति नाम्ना सन्नयासाश्रमदानम्

चिन्तयामासुरत्यन्तं तेषु स्नेहसमन्विताः ।
अथ श्रीमत्पाण्डुरङ्गी नरसिंहाख्य भूसुरान् ॥ ९ ॥

समानीय ददुः तेभ्यः तुर्याश्रममतन्द्रिताः ।
तेषां दक्षिणकर्णेऽथ वेदव्याससुनीश्वराः ॥ १० ॥

वामे तु विद्यापतय उपदेशं प्रचक्रिरे ।
अभिषेकं ततः कृत्वा विद्याधीशमुनीश्वराः ॥ ११ ॥

इति नाम ददुः प्रीताः वेदव्याससुनीश्वराः ।
जितासनारिषड्वर्गा विद्याधीशा विरेजिरे ॥ १२ ॥

दत्त्वा वंशाभिधं रामं व्यासं च सिकतामयम् ।
सर्वेदिग्विजयार्थं तान् चक्रुः प्रेषयितुं मनः ॥ १३ ॥

चामराजस्य भोजनेक्रिमिदर्शनदोषपरिहारः

एतस्मिन्नेव समये श्रीरङ्गाभिधपट्टणे ।
चामराजाभिधो राजा स्वीयं राज्यमपालयत् ॥ १४ ॥

भोजनावसरे तस्य नित्यं प्राचीनकर्मणा ।
क्रिमिरूपो हि अन्नराशिरदृश्यत महीपतेः ॥ १५ ॥

श्रुत्वा वेदव्यासतीर्थमाहात्म्यं स नराधिपः ।
प्रेषयामास विज्ञप्तिपत्रमाकारणाय तान् ॥ १६ ॥

तां पत्रिकां वाचयित्वा विद्याधीशमुनीश्वरान् ।
प्रीत्या ते प्रेषयामासुः चामराजसभां प्रति ॥ १७ ॥

गतेषु तेषु राजा तानभिगम्याखिलैः सह ।
निरन्तरं पूजयन् तान् स्थापयामास पट्टणे ॥ १८ ॥

भोजनावसरे प्राप्ते श्रीपादैरभिमन्त्रितम् ।
अन्नमानीय वुभुजे क्रिमयोऽदृश्यतां गताः ॥ १९ ॥

राजा तदद्भुतं दृष्ट्वा तेषु भक्तिसमन्वितः ।
ददौ तेभ्यः चिणिग्रामं सन्तुष्टः तेन कर्मणा ॥ २० ॥

ततो वेदव्यासतीर्थाः तानाहूय मुदान्विताः ।
तेभ्यो दत्त्वाऽदृष्टलब्धं महासंस्थानमूचिरे ॥ २१ ॥

सम्मानिताः यथास्माभिः कृष्णद्वैपायनाः पुरा ।
तथा भवद्भिरपि ते माननीयाः प्रयत्नतः ॥ २२ ॥

श्रीवेदव्यासतीर्थस्य वृन्दावनप्रवेशः

इत्युक्त्वा पिनगुण्ड्यां ते कौण्डिण्याख्यनदीतटे ।
रामवेदव्यासपूजां विधाय परया मुदा ॥ २३ ॥

सिद्धार्थ्यब्दे चैत्रशुक्ले द्वितीयायां गुरूत्तमाः ।
त्यक्त्वा देहं स्वस्थचित्ता परलोकं प्रपेदिरे ॥ २४ ॥

ततो विद्याधीशतीर्थाः महासंस्थानसंयुताः ।
पिनगुण्डिस्थविद्वद्भ्यः दत्त्वा तुर्याश्रमं मुदा ॥ २५ ॥

श्रीवेदनिधितीर्थस्य सन्न्यासाश्रमदानम्

कृत्वाभिषेकं तैः साकं देवपूजां विधाय च ।
वेदनिध्याख्यतीर्थोऽयमिति नाम ददुस्तदा ॥ २६ ॥

श्रीविद्याधीशतीर्थेन रङ्गोजीभट्टस्य वांदे पराजयः

ततो वेणुपुरीं गत्वा तत्र काश्याः समागतम् ।
रङ्गोजिभट्टमद्वैतवादिनं हठवादिनम् ॥ २७ ॥

सभायामात्मभिः साकं प्रसङ्गं कर्तुमागतम् ।
दृष्ट्वा प्रसङ्गं चक्रुस्ते तेन साकं सभातले ॥ २८ ॥

दर्शनादभ्रशिरस इति श्लोके तयोर्द्वयोः ।
प्रसङ्गश्चाभवत् सोऽथ विद्याधीशैः पराजितः ॥ २९ ॥

त्यक्त्वा वेणुपुरीं भीत्या पलायनपरायणः ।
जगाम पैठणं ते तमनुसृत्य गतास्तदा ॥ ३० ॥

तत्र जित्वा मायिवरं जयपत्रं प्रगृह्य ते ।
क्रमाद् धर्मपुरीं प्रापुः गङ्गायात्रामनोरथाः ॥ ३१ ॥

तत्र वेदनिधीनां तु समीपे गुरुशेखराः ।
महासंस्थानमखिलं स्थापयित्वा द्विजैः सह ॥ ३२ ॥

गृहीत्वा दिग्जयं रामं द्वितीयं बादरायणम् ।
जग्मुः भागीरथीयात्रां कर्तुं यात्राजनैः सह ॥ ३३ ॥

आदौ पूर्वदिशं गत्वा सप्तसागरमेत्य ते ।
वसिष्ठसागरं गत्वा स्नानं चक्रुर्विधानतः ॥ ३४ ॥

तत्र स्वादूदराहित्याल्लोकानुग्रहकाङ्क्षया ।
श्रीपादाः खन्यतामत्रेत्युक्त्वा दण्डेन भूतलम् ॥ ३५ ॥

अदर्शयन् ते खनिते जनैः स्वादूदमागतम् ।
ततः काशीपुरं प्राप्य गङ्गास्नानं विधाय च ॥ ३६ ॥

गयाविप्राणां वैष्णवदीक्षादानम्

गयामवाप्य ते फल्गुतीरे वासं प्रचक्रिरे ।
तत्र पिण्डप्रदानार्थं तत्रत्यैस्तु द्विजातिभिः ॥ ३७ ॥

साकं यात्राद्विजानां च विवादः समजायत ।
तदा विद्याधीशतीर्थैः निश्चितं जनसंसदि ॥ ३८ ॥

अस्मद्दिग्विजयो रामः फल्गुतीरे समास्थितः ।
तस्मादियं धरा रामगयास्माकं न संशयः ॥ ३९ ॥

वासं चक्रुः नदीतीरे विद्याधीशाः सहाखिलैः ।
तत्रासीत् बदरीशाखावृतिः शुष्का गृहाङ्गणे ॥ ४० ॥

तस्यां तु पतिताः तीर्थदाने शङ्खोदबिन्दवः ।
यत्र यत्र प्रपतिताः सञ्जाताः तत्र पल्लवाः ॥ ४१ ॥

दिनैः कतिपयैः सर्वाः क्रमाद् वृक्षा बभूविरे ।
दृष्ट्वा तदद्भुतं कर्म स्वामिनां महतीं तदा ॥ ४२ ॥

गयाविप्राः समागत्य प्रणम्याथ ययाचिरे ।
स्वामिभिः क्षम्यतामस्मदपराधः कृपालुभिः ॥ ४३ ॥

वयं शिष्या भविष्यामः तप्तमुद्रादिधारणैः ।
अद्यैव विष्णुपादस्य दर्शनार्थं हि गम्यताम् ॥ ४४ ॥

एवं सम्प्रार्थिताः तैः ते विद्याधीशमुनीश्वराः ।
कांश्चित् द्विजान् वैष्णवांश्च कृत्वा विष्णुपदं गताः ॥ ४५ ॥

श्राद्धानि कारयित्वाथ सर्वैः प्रीतिपुरस्सरम् ।
स्वयं दण्डोदकं दत्वा ययुर्बदरिकाश्रमम् ॥ ४६ ॥

एकचक्रनगरे वृन्दावनप्रवेशः

शीतकुण्डोदके स्नात्वा वह्निकुण्डोदके ततः ।
पुनरागत्य तेचैकचक्राख्यनगरं प्रति ॥ ४७ ॥

अन्तकाले समायाते तत्र वासं प्रचक्रिरे ।
प्रजापत्याह्वये वर्षे पुष्यमासे परे दले ॥ ४८ ॥

चतुर्दशीदिने प्रातः स्नात्वा शुद्धासने स्थिताः ।
सन्नियम्येन्द्रियग्रामं परं हरिपदं ययुः ॥ ४९ ॥

श्रीविद्याधीशतीर्थाचरितसुचरितं कीर्तयेत् यः प्रभाते
सोऽस्मिन् तत्पादयुग्मार्पितसकलशुभाचारविध्वस्ततापः ।
जित्वा सर्वेन्द्रियाणि प्रतिदिवसमलं साधयेत् साधनानि
श्रीमद्विष्णोः प्रियाणि व्रतनियमसुखादीनि तेषां प्रसादात् ॥ ५० ॥

इति श्रीदैवज्ञभीमविरचित पूर्णबोधगुरुवंशकथाकल्पतरौ त्रयोदशचतुर्दशसर्गयोः उपवर्णितस्य श्रीविद्याधीशमहिमवर्णनस्य सारसङ्ग्रहः पाण्डुरङ्गितमणाचार्यसूनु कृष्णाचार्येण सङ्गृहीतः समाप्तः ॥

श्रीपूर्णबोधगुरुवंशकथाकल्पतरौ

श्रीसत्यविजयचरितम्

मङ्गलश्लोकाः

प्रणम्य चरणद्वन्द्वं बादरायणमध्वयोः ।
जगद्गुर्वन्वयकथां तत्प्रीत्यै कीर्तयाम्यहम् ॥ १ ॥

श्रीसत्यपूर्णेन श्रीसत्यविजयस्य संन्यासाश्रमदानम्

श्रीसत्यपूर्णतीर्थास्तु मन्नाराख्यपुरस्थितान् ।
बाबाचार्यान् समाहूय ददुः संस्थानमाशु ते ॥ २ ॥

दत्त्वा संन्यासमथ तानभिषिच्य गुरोः पदे ।
तेभ्यो नाम ददुः प्रीताः श्रीसत्यविजया इति ॥ ३ ॥

ततः कर्नाटकं गत्वा श्रीसत्यविजयैः सह ।
कृत्वा दिग्विजयं तत्र मानिताः प्रभुशेखरैः ॥ ४ ॥

ततो भागीरथीयात्रां कर्तुं संस्थानसंयुताः ।
श्रीसत्यविजयैः साकं निर्गताः चोलमण्डलात् ॥ ५ ॥

गतेषु सत्यपूर्णेषु गङ्गायात्रापरेष्वथ ।
तदानीं तैरनुज्ञप्ताः श्रीसत्यविजयाभिधाः ॥ ६ ॥

महासंस्थानसंयुक्ताः जागरूकास्त्वहर्निशम् ।
विनिर्गत्य क्रमात् तस्मात् कुरिष्पट्टं प्रपेदिरे ॥ ७ ॥

श्रीसत्यविजयतीर्थाः



श्रीविभीषणसाम्राज्यप्रदरामपदाम्बुजे ।
संसक्तः सत्यविजयहंसो मे भासतां हृदि ॥

श्रीसत्यविजयश्रीसत्यप्रियतीर्थयोः सौहार्दसम्पादनम्

यदा त्वजाद्रिमासुस्ते श्रीसत्यविजयाभिधाः ।
सत्यवर्या अपि तदा तत्समीपे समागताः ॥ ८ ॥

लक्कुण्डिसंस्थितानन्दतीर्थाचार्याः ततः परम् ।
हृदा विचारयामासुरग्रे कार्यं द्विजोत्तमाः ॥ ९ ॥

महासंस्थानसंयुक्ताः श्रीसत्यविजयाभिधाः ।
वयसा चातिवृद्धा हि परंत्वाश्रमतोऽधमाः ॥ १० ॥

अणुसंस्थानसंयुक्ताः समर्थाः कार्यसाधने ।
आश्रमे श्रीसत्यवर्याः ज्येष्ठाश्च वयसाऽधमाः ॥ ११ ॥

तस्मात्तु दण्डव्यत्यासं कारयित्वा परस्परम् ।
उभाभ्यामणुसंस्थानं सत्यवर्येभ्य एव तत् ॥ १२ ॥

श्रीसत्यविजयार्येभ्यो महासंस्थानमित्यथ ।
उभयोरनुमत्या तत्कार्यमेवेति निश्चिताः ॥ १३ ॥

एवं तेषां वचः श्रुत्वा श्रीपादौ तावुभावपि ।
कृत्वा परस्परं दण्डव्यत्यासं त्वैकमत्यतः ॥ १४ ॥

मत्वा संस्थानसंयुक्ताः श्रीसत्यविजयाभिधाः ।
ददुः श्रीसत्यवर्येभ्यः नाम सत्यप्रिया इति ॥ १५ ॥

अथ ते त्वणुसंस्थानपदार्थान् देवसंयुतान् ।
दत्वाऽनुज्ञां ददुः तेभ्यः सञ्चारार्थं महीतले ॥ १६ ॥

ततस्ते सत्यविज्ञयतीर्थाः कर्णाटकं प्रति ।
गत्वा तत्र स्थिताशेषलोकेभ्यो देवदर्शनम् ॥ १७ ॥

कारयित्वा ततस्तीर्थादिकं दत्त्वा गुरूत्तमाः ।
आरण्यां चक्रिरे वासं षडारण्यसमीपतः ॥ १८ ॥

ततः कृष्णाख्यपन्तेन मठे मुख्याभिमानिना ।
पूजिताः कतिचित् कालमूषुस्ते स्वेच्छया सुखम् ॥ १९ ॥

श्रीसत्यपूर्णतीर्थस्य वृन्दावनप्रवेशः

ततः कतिपयैः कालैः सत्यपूर्णमुनीश्वराः ।
कृत्वा भागीरथीयात्रां कोल्पुरं ते समागताः ॥ २० ॥

पराभवाभिधे वर्षे ज्येष्ठमासे सितेतरे ।
पक्षे द्वितीयदिवसे सत्यपूर्णमुनीश्वराः ॥ २१ ॥

स्नात्वाथ प्राणदेवेन सह तत्त्वाभिमानिभिः ।
पूजयन्तो विष्णुमूर्तिं जग्मुर्वैकुण्ठमुत्तमम् ॥ २२ ॥

वृन्दावनमभूत्तत्र श्रीसत्यविजयाज्ञया ।
समाराधनपूर्वं ते चक्रुः सत्यप्रियैः सह ॥ २३ ॥

ततः सर्वाणुसंस्थानपदार्थादीन् गुरूत्तमाः ।
दत्त्वा सत्यप्रियाख्येभ्यः श्रीसत्यविजयाभिधाः ॥ २४ ॥

पुनर्दिग्विजयार्थं तान् प्रेषयित्वा ततःपरम् ।
स्वयं कर्णाटकं जग्मुः महासंस्थानसंयुताः ॥ २५ ॥

यदा श्रीसत्यविजयाः कोल्पुरात्तु विनिर्गताः ।
तदा देशेषु सञ्चारं कृत्वा कर्णाटकं गताः ॥ २६ ॥

षडारण्यके कृष्णाजीपन्तेन श्रीसत्यविजयस्य सत्कारः

श्रीपादागमनं श्रुत्वा षडारण्यकसंस्थितः ।
कृष्णाजिपन्तः स्वैर्विप्रैराह्वयामास तान् तदा ॥ २७ ॥

तैरर्थितास्तु श्रीपादाः षडारण्यकसंज्ञकम् ।
गत्वा कृष्णाजिपन्तेन पूजितास्त्वारणीं ययुः ॥ २८ ॥

तत्र वेङ्कटराजेन पूजिताश्च सभातले ।
ऊषुस्ते कतिचित् कालं तत्रैव गुरुशेखराः ॥ २९ ॥

स्वर्णपीठं वज्रचितसम्पुटं रत्नमण्डितान् ।
अलङ्कारान् ददौ तेभ्यः भक्त्या कृष्णाख्यपण्डितः ॥ ३० ॥

तदानीं सत्यविजयश्रीपादानां समीपगाः ।
संस्थानदाने त्वन्येभ्यः वृथा यत्नं प्रचक्रिरे ॥ ३१ ॥

सत्यप्रियाः तदखिलं श्रुत्वा स्वीयजनैः ततः ।
आर्याणामन्तिकं नैव गता व्यत्यस्तचेतसः ॥ ३२ ॥

ततस्ते सत्यविजयाः श्वासरोगेण पीडिताः ।
चक्रुः दिग्विजयं चोलमण्डले तदनन्तरम् ॥ ३३ ॥

आरणीनगरे श्रीसत्यविजयस्य वृन्दावनप्रवेशः

श्रीपादस्त्वारणीमेत्य वेङ्कटप्रभुसद्मनि ।
देवपूजां ततः कृत्वा भुक्त्वा द्विजगणैः सह ॥ ३४ ॥

उषित्वा तद्दिने रात्रौ श्वासेनात्यन्तपीडिताः ।
ब्राह्मे मुहूर्ते चोत्थाय चोपविष्टा बभूविरे ॥ ३५ ॥

तदानीं वेङ्कटाख्यं ते समाहूय गुरूत्तमाः ।
पदार्थमखिलं देवं तदधीनं विधाय च ॥ ३६ ॥

ततस्तमूचुः श्रीपादाः वेङ्कटाख्यं प्रभूत्तमम् ।
दूरदेशं गताः सत्यप्रियाः संस्थानसंयुताः ॥ ३७ ॥

अस्माकं परलोकस्य यात्राकालः समागतः ।
तस्मात् सर्वं तवाधीनं जातं विज्ञप्तिपत्रिकाम् ॥ ३८ ॥

लिखित्वा प्रेषय क्षिप्रं श्रीमत्सत्यप्रियान् प्रति ।
आगताश्चेत् त्वया देयं तेभ्यः सर्वं त्वयि स्थितम् ॥ ३९ ॥

तान् विना सर्वथान्येभ्यो न देयं देवसंयुतम् ।
इत्युक्त्वा तं प्रति ततः चक्रुः मृच्छौचपूर्वकम् ॥ ४० ॥

ततस्ते सत्यविजयतीर्थाः सिद्धार्थिवत्सरे ।
चैत्रमासे कृष्णपक्षे चैकादश्यामिनोदये ॥ ४१ ॥

स्नात्वा योगायोपविष्टाः लयचिन्तनतत्पराः ।
भुवि देहं परित्यज्य परं हरिपुरं ययुः ॥ ४२ ॥

स कौण्डिण्यनदीतीरे वेङ्कटप्रभुशेखरः ।
कारयामास श्रीपादवृन्दावनमनन्यधीः ॥ ४३ ॥

श्रीसत्यप्रियतीर्थस्य आरणीं प्रति आगमनम्

ततःपरं स विज्ञप्तिपत्रिकामतिशीघ्रतः ।
लिखित्वा प्रेषयामास श्रीमत्सत्यप्रियान्तिकम् ॥ ४४ ॥

ततस्ते शीघ्रमानीतां विप्रैर्विज्ञप्तिपत्रिकाम् ।
विलोक्य जग्मुः त्रिचतुर्योजनानि निरन्तरम् ॥ ४५ ॥

द्वाविंशद्दिवसे प्राप्तास्त्वारणीं गुरुशेखराः ।
श्रीमत्सत्यप्रियान् दृष्ट्वा तेभ्यो वेङ्कटनायकः ॥ ४६ ॥

रामव्यासैः सहाशेषपदार्थान् स समर्पयत् ।
आराधनानि चक्रुस्ते नित्यं ते दिवसत्रयम् ॥ ४७ ॥

यः श्रीमद्गुरुराजसत्यविजयश्रीपादयोगादिसत्-
कर्मोद्भूतकथामिमामहरहः प्रातः शुचिः कीर्तयेत् ।
सोऽस्मिन् सज्जनसङ्घकीर्तितगुणो नीतिप्रवीणः सदा
सद्व्यासङ्गरतश्च तत्करुणया योगी भवेत् सर्वदा ॥ ४८ ॥

इति श्रीदैवज्ञभीमविरचितपूर्णबोधगुरुवंशकथाकल्पतरौ त्रयोविंशचतुर्विंश-
सर्गयोरुपवर्णितस्य श्रीसत्यविजयतीर्थमहिमवर्णनस्य
सारसङ्ग्रहः पाण्डुरङ्गी तमणाचार्यसूनुकृष्णाचार्येण सङ्गृहीतः समाप्तः ॥

॥ श्रीः ॥

श्रीसत्यप्रज्ञचरितम्

मङ्गलश्लोकाः

करवीरपुरस्थायाः श्रियः पत्युः पदाम्बुजे ।
प्रणम्य प्रार्थये ज्ञानभक्तिवैराग्यसम्पदम् ॥ १ ॥

पूर्णप्रज्ञं गुरुं नत्वा विद्याधीशं कुलोद्वहम् ।
सत्यप्रज्ञस्य चरितं कीर्तयामि यथामति ॥ २ ॥

पाण्डुरङ्गीवंशमूलपुरुषः आनन्दभट्टारकः

गोदावरीतटाकस्थपुण्यस्तम्भपुरे पुरा ।
आनन्दभट्ट इत्यासीत् पाण्डुरङ्गीकुलाग्रजः ॥ ३ ॥

तपसा परितुष्टाऽस्य करवीरपुराधिपा ।
दर्शनं सर्परूपेण ददौ विद्यां प्रजास्तथा ॥ ४ ॥

अद्वैतसिद्धिकुलिशं कण्ठकोद्धारनामिकाम् ।
व्याख्यां न्यायामृतस्याऽयं कृत्वा कीर्तिमवाप्तवान् ॥ ५ ॥

वादिराजस्याज्ञयाऽसौ तत्कृपाबलपोषितः ।
अद्वैतपण्डितं जित्वा जयपत्रमवाप्तवान् ॥ ६ ॥

वादिराजादवाप्योच्च सुप्रीतमनसस्ततः ।
शालग्रामं रत्नगर्भं हयास्यप्रतिमां तथा ॥ ७ ॥

श्रीसत्यध्यानतीर्थाः
(1914–42)

श्रीसत्यप्रज्ञतीर्थाः
(1942–45)

श्रीविद्याधीशतीर्थाः

तस्य पुत्रो नृसिंहाख्यः ज्ञानवैराग्यसागरः ।
वेदान्तपीठमारुह्य विद्याधीश इति श्रुतः ॥ ८ ॥

साधनद्वादशीकाले लक्षब्राह्मणभोजनम् ।
शूर्पग्रामेऽकारयच्च मातुः सङ्कल्पपूरकम् ॥ ९ ॥

वाक्यार्थचन्द्रिकाग्रन्थं रचयामास यः सुधीः ।
प्रदक्षिणी चकारासौ गौतमीं च सरिद्वराम् ॥ १० ॥

विष्णुदीक्षां ददौ योगी गयविप्रेभ्य एव च ।
गत्वा च बदरीक्षेत्रं ननाम हरिमादरात् ॥ ११ ॥

केशवभट्टारकः

तस्यानुजः केशवार्यः प्रियः परतरोऽस्य हि ।
शुकवत् शिक्षितोऽनेन कृतवान् टिप्पणीः शुभाः ॥ १२ ॥

शेषवाक्यार्थचन्द्राख्यटिप्पण्या समपूरयत् ।
वाक्यार्थचन्द्रिकां योऽसौ विद्याधीशाज्ञया मुदा ॥ १३ ॥

विद्याधीशगुरूत्तंसकृपाबलसमन्वितः ।
तात्पर्यचन्द्रिकावृत्तिं रचयामास विस्तराम् ॥ १४ ॥

दश प्रकरणं तेन टिप्पणीभिर्विभूषितम् ।
ऋचां भाष्यस्य टीकापि व्याख्याता प्रौढया गिरा ॥ १५ ॥

श्रीसत्यविजयतीर्थाः

तस्य पुत्रौ श्रीनिवासनृसिंहाख्यौ बुधोत्तमौ।
श्रीनिवासस्य पुत्रोऽभूत् बाबाचार्य इति श्रुतः ॥ १६ ॥

मेरुस्वामिकृते ग्रामे राजमन्नारसन्निधौ।
बाबाचार्यः बुधैः सार्कं न्यवसत् चोलमण्डले ॥ १७ ॥

सोऽपि वेदान्तसाम्राज्यमारुरोह कुशाग्रधीः।
श्रीसत्यविजयाख्येन नाम्ना विख्यातवैभवः ॥ १८ ॥

आरणीपतिना कृष्णपन्तेन बहुसेवितः।
श्रीसत्यविजयस्तत्र वासं चक्रे यतीश्वरः ॥ १९ ॥

वृन्दावनं च तस्याद्य राजते भक्तसेवितम्।
कौण्डिण्यतटिनीतीरे विप्रवृन्देन भूषिते ॥ २० ॥

रत्नमाला नरसिंहाचार्यः तत्सन्ततिपरम्परा च

द्वितीयः पुत्र एषोऽसौ केशवार्यस्य धीमतः।
नृसिंहाख्यो रत्नमालाकर्तेति बहुविश्रुतः ॥ २१ ॥

वाक्यार्थरत्नमालेति टिप्पणी तेन निर्मिता।
वाक्यार्थचन्द्रिकाभावं विशदं विवृणोति या ॥ २२ ॥

नृसिंहार्यात् सप्तमोऽभूत् रङ्गाचार्य इति श्रुतः।
श्रीसत्यधीरवर्यस्य पूर्वाश्रमसुतापतिः ॥ २३ ॥

भीमकृष्णजयाख्यास्तु तस्य पुत्रास्त्रयोऽभवन् ।
श्रीसत्यध्यानतीर्थस्य भागिनेया बुधोत्तमाः ॥ २४ ॥

श्रीसत्यध्यानतीर्थाः

ज्ञाने दाने च वित्तस्य वाक्यार्थपरिषत्सु च ।
अन्नदाने समो नास्ति सत्यध्यानयतेः खलु ॥ २५ ॥

वाराणस्यां कुम्भकोणे महीशूरपुरे तथा ।
आसेतुहिमवत् तेन ताडिता द्वैतदुन्दुभिः ॥ २६ ॥

यतयश्चापि तच्छिष्याः चन्द्रिकापठने रताः ।
परश्शतं छात्रसङ्घः सुधावाक्यार्थकोविदः ॥ २७ ॥

भण्डारकेरीमठपः विद्यामान्ययतीश्वरः ।
तच्छिष्येष्वग्रणीरासीत् मूर्धन्यः सात्त्विकेषु च ॥ २८ ॥

चन्द्रिकामण्डनं गीतासभासारस्य सङ्ग्रहः ।
ब्रह्मसूत्रं भेदपरं ग्रन्थरत्नानि तस्य वै ॥ २९ ॥

मध्वसिद्धान्ताभिवृद्धिकारिणी परिषत् कृता ।
गुरोः समाराधने तु मृष्टान्नं वर्षितं मुदा ॥ ३० ॥

कृष्णाचार्यजयाचार्यौ

सत्यध्यानस्य वात्सल्यपात्रमासीद् विशेषतः ।
कृष्णाचार्यः पाण्डुरङ्गी वेदान्तन्यायकोविदः ॥ ३१ ॥

वाक्यार्थे वा प्रवचने प्रधानाङ्गं यतेर्मुदा ।
कृष्णाचार्य इति ख्यातिर्लोकेऽद्यापि च विश्रुता ॥ ३२ ॥

तस्यानुजो जयार्योऽपि ख्यातिमाप सभासु वै ।
तर्के वेदान्तविद्यायां महत्पाण्डित्यमावहन् ॥ ३३ ॥

मठस्य कार्यनिर्वाहसचिवो मुख्य एष वै ।
अन्नदाने स्वर्णदाने प्रधानाङ्गं यतेरभूत् ॥ ३४ ॥

कृष्णाचार्यः सभामध्ये जयार्यो मठकर्मणि ।
सत्यध्यानयतीशस्य द्वावेतौ भुजसन्निभौ ॥ ३५ ॥

श्रीसत्यप्रज्ञतीर्थाः

जयार्योऽयं भाग्यवशात् यतिपीठमवाप्तवान् ।
सत्यप्रज्ञ इति ख्यातः पाण्डुरङ्गपुरेऽवसत् ॥ ३६ ॥

चैत्रशुक्लाष्टमीवारे चित्रभानौ हि वत्सरे ।
सत्यध्यानो यतिश्रेष्ठः जगाम हरिमन्दिरम् ॥ ३७ ॥

गुरोर्वृन्दावनं कृत्वा वेदनिध्यार्यसन्निधौ ।
भीमरथ्याः तटे रम्ये समाराधनमाचरत् ॥ ३८ ॥

लक्षाधिकेभ्यो विप्रेभ्यः मृष्टान्नं प्रददौ यतिः ।
सत्यध्यानस्य शिष्यत्वं ख्यापयामास कार्यतः ॥ ३९ ॥

सुधाप्रवचने सक्तः नित्यं रामार्चने रतः ।
उवास वत्सरं तत्र पाण्डुरङ्गस्य सन्निधौ ॥ ४० ॥

दशलक्षमितं तावत् ऋणं प्रत्यर्प्य वत्सरे ।
निष्किञ्चनत्वं यतिनोऽसाधयत् ऋणमोचनात् ॥ ४१ ॥

रायचूरुनगरे रम्ये समाराधनमाचरत् ।
द्वितीयमद्वितीयं तत् जनैरद्यापि स्मर्यते ॥ ४२ ॥

आत्कूरुनगरं रम्यं कृष्णातीरे विराजितम् ।
गच्छन्नुवास तत्रैव मासान् कतिपयान् यतिः ॥ ४३ ॥

सत्यकामं सत्यधीरं प्रीणयन् प्रवचनेन हि ।
यतिधर्माननवतिष्ठत् तपोवैराग्यसिद्धिमान् ॥ ४४ ॥

श्रीसत्याभिज्ञतीर्थाः

मठस्य भारमारोढुमवृणोत् शिष्यमुत्तमम् ।
सत्याभिज्ञेति नाम्ना तं ख्यापयामास संसदि ॥ ४५ ॥

चैत्रशुक्लद्वितीयायां पार्थिवे वत्सरे गुरुः ।
योगेनाक्रान्तचित्तस्सन् जगाम हरिमन्दिरम् ॥ ४६ ॥

कृष्णवेण्यास्तटाकेऽत्र वृन्दावनमकारयत् ।
सत्याभिज्ञः पुण्यकर्मा गुरुचित्तमनुस्मरन् ॥ ४७ ॥

श्रीसत्यप्रमोदतीर्थाः

वत्सरत्रयमासेवन् मूलरामं यतीश्वरः ।
सत्यप्रमोदमकरोदुत्तरादिमठेश्वरम् ॥ ४८ ॥

षट्त्रिंशद्वर्षतः पीठमलङ्कुर्वन् महोज्ज्वलः ।
सत्यप्रमोदतीर्थोऽयं राजते हंसराडिव ॥ ४९ ॥

सुधामङ्गलमाङ्गल्यदीपेनार्चन् रघूत्तमम् ।
वसुधामण्डनं कुर्वन् सुधामण्डनमण्डितः ॥ ५० ॥

उपसंहारः

पूर्णप्रज्ञात् प्रमोदान्तं ये तावत् गुरुशेखराः ।
प्रणमामि हि तान् सर्वान् ज्ञानवैराग्यसिद्धये ॥ ५१ ॥

तमणाचार्यपुत्रेण कृष्णाचार्येण धीमता ।
सत्यप्रज्ञस्य चरितं कीर्तितं स्वात्मतुष्टये ॥ ५२ ॥

य इदं पठते भक्त्या शृणोति परमादरात् ।
गुर्वनुग्रहपात्रः स्यात् गुरुभक्तिं लभेत च ॥ ५३ ॥

इति श्री पाण्डुरङ्गि तमणाचार्य पुत्रेण कृष्णाचार्येण विरचितं
सत्यप्रज्ञचरितं समाप्तम्।

श्रीवादिराजगुरुवरचरितामृते

आनन्दभट्टारकवृत्तान्तः

अद्वैतपण्डितः कश्चित् वादार्थं पत्रमालिखत् ॥ ५-१९ ॥

एतद्दिने स्थले तत्र वादो निश्चयतो भवेत् ।
इति पत्रार्थमालोक्य वादिराट् तत्स्थलं गतः ॥ २० ॥

निश्चिते वासरे नाहमागन्तुं प्रभवाम्यतः ।
इतस्तृतीये दिवसे समागन्तेति सूचितः ॥ २१ ॥

प्रतीक्षमाणो नापश्यत् वादिनं वादिराट् मुनिः ।
सामीप्यात् कृष्णपर्यायपूजायाः गमनोद्यतः ॥ २२ ॥

पाण्डुरङ्गयन्वयोद्भूतमानन्दाख्यं बुधोत्तमम् ।
न्ययूयुजत्तज्जायाय ददौ मन्त्राक्षतान् गुरुः ॥ २३ ॥

तदागमनपर्यन्तमत्र स्थित्वा विजित्य तम् ।
रूप्यपीठं समागच्छ कामितं सेत्स्यतीति तम् ॥ २४ ॥

आनन्दभट्टः पश्चात् तमागतं वादिनं जयन् ।
तस्माद् वादपराभूतिपत्रं प्राप्य समागतः ॥ २५ ॥

कृष्णपर्यायसक्तश्रीवादिराजाय पत्रकम् ।
अर्पयामास भवतां दयया विजितो बली ॥ २६ ॥

इत्यावेदयदानन्दभट्टः सन्तानकाङ्क्षया ।
वादिराजं प्रार्थयन् सः पुत्रावाप्तिर्भवेदिति ॥ २७ ॥

गुरुराजाद् वरं प्राप्य तुष्टः स्वगृहमाययौ ।
गुरूत्तमानुग्रहेण पुत्रं प्राप्य कृती मुदा ॥ २८ ॥

गुरुराजाभिधानं तं चकारानन्दभट्टकः ।
पित्रोरानन्ददायी स ववृधे शुक्लचन्द्रवत् ॥ २९ ॥

इति श्री वादिराजपूज्यचरणप्रशिष्यश्रीवेदनिधितीर्थान्तेवासि रामचन्द्राचार्यविरचिते श्रीवादिराजगुरुवरचरितामृते पञ्चमबिन्दौ पाण्डुरङ्गि आनन्दभट्टारकवृत्तान्तः १९ श्लोकादारभ्य २९ श्लोकपर्यन्तं वर्तमानः ।
(अस्मिन् पञ्चमबिन्दौ एतत्पूर्वं कनकदासवृत्तान्तः, एतदनन्तरं भूतराजवृत्तान्तश्च वर्तेते । चरितामृतं च इदं श्रीवादिराजग्रन्थप्रकाशनसमित्या १९५४ तमे क्रिस्ताब्दे प्रकाशितम्)



श्रीविद्याधीशतीर्थानां पादुके

श्रीविद्याधीशस्तोत्राणि

(श्रीविद्याधीशशिष्यविरचितटिप्पणीग्रन्थेषु उपलभ्यमानानि)

यद्विद्याधीशगुरोः शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुक्ता श्रीविद्याधीशपादयोः सेवा ॥ १ ॥

(केशवभट्टारककृतसर्वासु टिप्पणीषु)

विद्याधीशं चन्द्रिकाब्धिविक्रीडनविचक्षणम् ।
विद्यागुरुं कुलगुरुं नौमि तं मे जगद्गुरुम् ॥ २ ॥

(तात्पर्यचन्द्रिकायाः केशवभट्टारककृतगुरुराजीयाख्यटिप्पण्याम्)

वेदव्यासमतापगापतिवरं श्रीमज्जयप्रोक्तसत्-
सर्पविष्टितमध्वसन्मुनिवरग्रन्थागवर्येण यः ।
संलोड्याखिलसन्नयामृतवरं तत्त्वादिसद्दीपिकाम्
सत्तात्पर्यसुचन्द्रिकां तरुवरं यस्तर्कसत्ताण्डवम् ॥ ३ ॥

निष्कास्याद्भुतखण्डनत्रयमुखव्याख्यानरत्नोच्चयम्
दृष्ट्वा कुत्सितयुक्त्यरातिपिहितान् श्रीव्यासतीर्थो बुधः ।
स्वोक्तिं रक्षितुमत्र यः प्रतिपदं सम्यग् विशेषार्पकः
विद्याधीशयतीन्द्रसद्गुरुवरः किं नावतीर्णः स हि ॥ ४ ॥

(ता.च.टि.) (शे.वा.च.)

श्रीमत्सुधाद्भुताम्बोधिविक्रीडनविचक्षणान् ।
श्रीमद्विद्याधीशतीर्थमुनीन् वन्दे गुरून् मम ॥ ५ ॥

(शेषवाक्यार्थचन्द्रिकायामादौ)

विद्वन्मत्तेभकुम्भाद्रिविपाटनविचक्षणः ।
विद्याधीशनृसिंहो मे गुरुर्नित्यं भवेन्मुदे ॥ ६ ॥
(शेषवाक्यार्थचन्द्रिकायां प्रथमाध्यायसमाप्तौ)

श्रीमद्विद्याधीशतीर्थं सर्वविद्यास्वधीश्वरम् ।
विद्यागुरुं कुलगुरुं नौमि तं मे जगद्गुरुम् ॥ ७ ॥
(केशवभट्टारककृतऋग्भाष्यटिप्पण्याम्)

यस्य प्रमाचन्द्रिकया ध्वान्तं विध्वंसमाययौ ।
श्रीशतत्त्वप्रबोधाय विद्याधीशबुधं भजे ॥ ८ ॥
(केशवभट्टारककृतकथालक्षणटिप्पण्यामन्ते)

विद्याधीशमुनीन्द्रा ये सर्वविद्याविशारदाः ।
विद्यागुरून् कुलगुरून् नौमि तान्मे जगद्गुरून् ॥ ९ ॥
(केशवभट्टारककृतप्रमाणलक्षणटिप्पण्यामन्ते)

येनालाभि समस्तशास्त्रजमहाज्ञानं समाषोडशम्
येनाबोधि रमेशतत्त्वमपवाद्युक्तिश्च दूरीकृता ।
येनाकारि विरक्तिरच्युतपदे भक्तिश्च लोकश्रुता
विद्याधीशयतिः स मे परगुरुः विद्याप्रदीप्त्यै भवेत् ॥ १० ॥
(पाण्डुरङ्गनरसिंहाचार्यकृतवाक्यार्थरत्नमालायामादौ)

यद्धस्तनिस्सृतरमेशपदाभिषेक-
तीर्थेन शुष्कतरवः सरसा गयायाम् ।
जाता विपश्चिति जने बहुदेशसंस्थे-
तं दैवतं परपुमांसमहं नमामि ॥ ११ ॥
(वाक्यार्थरत्नमालायामादौ)

विद्यावनस्थलीयस्य ध्वानैर्दंध्वन्यतेऽनिशम् ।
द्रावयन्ति जगन्निद्रां विद्याधीशहरिं नुमः
(विद्वच्चूडामणिकृतविष्णुस्तुतिव्याख्यायामन्ते)

विद्याधीशपदाम्भोजरससिक्ता गिरो लता ।
स्मारं स्मारं सङ्गमिति त्रिविक्रमपदक्रमैः ॥ १३ ॥
(विष्णुस्तुतिव्याख्यायामन्ते)

विद्याधीशो विपुलमहिमा सर्वविद्याप्रवीणः
मायद्वादिद्विरददलने पञ्चवक्त्रायमाणः ।
वैराग्याद्यैर्युत उरुगुणैर्भिक्षुभूषायमाणैः
यत्यग्रोऽभूद्धरणिवलये वृद्धिमच्छुद्धकीर्तिः ॥ १४ ॥
(श्रीसत्यबोधविजये १ सर्गे ५५ श्लोकः)

शुकवत् शिक्षितो येन वेदान्तार्थविनिश्चये ।
तं वन्दे सद्गुरुं विद्याधीशाख्यमनिशं वरम् ॥ १५ ॥
(सौत्राथशब्दभावार्थप्रकाशे आदौ)

विद्याधीशाम्बुधरः कनकमयीं वृष्टिमद्भुतां वर्षन् ।
दारिद्र्यदावदूनान् धयत वनस्पतीन् साधून् ॥ १६ ॥
(सत्यनिधिविलासे ३ सर्गे ३७ श्लोकः)

श्रीसत्यविजयतीर्थस्तोत्राणि

श्रीविभीषणसाम्राज्यप्रदरामपदाम्बुजे ।
संसक्तः सत्यविजयहंसो मे भासतां हृदि ॥ १ ॥
(श्रीसत्यप्रियतीर्थविरचितकर्मनिर्णयटिप्पण्यामादौ)

अतिसत्यवादनिरतोऽतनुधीः
सुकृतान्तसम्प्रवचने चतुरः ।
स उदैष्ट सत्यविजयो विजयी
सकलासु दिक्षु ऋतपूर्णमुनेः ॥ २ ॥
(श्रीसत्यबोधविजये १३ सर्गे ५ श्लोकः)

श्रीसत्यविजयस्तोत्रपञ्चकम्

श्रीसत्यविजयं वन्दे सर्वाभीष्टप्रदायकम् ।
श्रीमदानन्दतीर्थार्यपादयोः भक्तिदं सदा ॥ १ ॥

सत्यजैत्राभिधं नौमि श्रीमन्तं श्रीप्रदं मम ।
ज्ञानदं भक्तिदं मेऽद्य जयतीर्थार्यसेवकम् ॥ २ ॥

सत्यपूर्णाब्धिसम्भूतं भक्तस्वान्तोत्पलं सदा ।
विकासयन्तं संशुद्धं सत्यजैत्रेन्दुमाश्रये ॥ ३ ॥

वेदान्तशास्त्रेषु सदा रमन्तम्
स्वभक्तसंरक्षणबद्धचित्तम् ।
महानुभावं भुवनैकवन्द्यम्
वन्दे गुरुं सत्यजयाभिधानम् ॥ ४ ॥

बन्धुस्त्वं गुरुरिष्टदैवतमिति त्वत्पादपङ्केरुहम्
प्राप्तं मां परिपालयेति सततं याचे निबद्धाञ्जलिः ।
चित्तं मद्गुणदोषचिन्तनविधौ नूनं मनाङ् मा कृथाः
नान्या मे गतिरस्ति सत्यविजयस्वामिन् त्वदङ्घ्रिं विना ॥ ५ ॥

[एतत्स्तोत्रस्थपञ्चमश्लोकः श्रीसत्यप्रियतीर्थविरचित इति ऐतिह्यम्]

श्रीसत्यप्रज्ञस्तोत्राणि

शमदमयुतं विप्रश्रेष्ठं जयार्यमिहैष सत्-
समयपट्टधीधुर्यं तुर्याश्रमव्रतसंस्थितम् ।
व्यधित च पदं सत्यप्रज्ञेत्यमुष्य गुणोचितम्
रहसि कृपया ब्रह्माण्यस्मै सुगोप्यमुपादिशत् ॥

(श्रीसत्यध्यानविजये सर्गः ५, श्लोकः ५९)

वाक्यार्थचन्द्रिकागोभिः प्रीणयन्तं सतोऽनिशम् ।
सत्यप्रज्ञमुनीन्द्रं तं प्रपद्ये शिष्यवत्सलम् ॥ ॥ १ ॥

अकामस्यापि कामौ द्वौ प्रावर्धेतां क्षणे क्षणे ।
वाक्यार्थचन्द्रिकापाठे श्रीरामाङ्घ्र्यर्चने तथा ॥ ॥ २ ॥

अशने रागहीनोऽपि वसनेऽभूत् स रागवान् ।
विषयाद् विमुखः शब्दविषये सर्वदोन्मुखः ॥ ॥ ३ ॥

प्रत्यप्यार्थं स धनिनां वियुक्तो लौकिकाद् ऋणात् ।
गुरोर्नालौकिकाद्यस्मान्नैवास्यास्ति प्रतिक्रिया ॥ ॥ ४ ॥

चातकायितशिष्याणां मुखोद्गतसुधारसैः ।
सभायां गुरुमेघोऽयं चित्रं शान्ततृषोऽभवत् ॥
(श्रीसत्याभिज्ञविजये सर्गः १, श्लोकः ५, ३१-३४)

आनन्दभट्टारकस्तोत्राणि

(श्रीविद्याधीशतीर्थानां पूर्वाश्रमपिता)

यद्धस्ताम्बुजसङ्गतोऽहमभवं देव्याः कटाक्षाश्रयः
यद्व्याख्यानदिवाकरेण विदुषामन्तस्तमः संहृतम् ।
ये प्रीता भुवि चन्दनद्रुम इव स्वीयं स्ववत्कुर्वते
तान् व्याख्यानिरतान् भजे परगुरून् आनन्दभट्टारकान् ॥ १ ॥
(शे.वा.च.)

श्रीमदानन्दोपपदाचार्यान् सद्गुणशालिनः ।
सर्वशास्त्रप्रवक्तॄंश्च वन्देऽहं धीविशुद्धये ॥ २ ॥
(प्र.ल.टि.)

पुण्यस्तम्भनिवासिगौतमसरित्स्नानाग्निहोत्रादिसत्-
श्रौतार्षादिगुरूक्तकर्मनिचयैः श्रीशप्रपूजारतान् ।
श्रीमध्वीयसुशास्त्रकण्टकहरान् तद्व्याकृतौ पण्डितान्
वन्दे व्याप्तसुशिष्यसन्ततियुतानानन्दभट्टारकान् ॥ ३ ॥
(वा.र.मा. आदौ)

श्रीनिवासाचार्यस्तोत्राणि

(श्री आनन्दभट्टारकस्य ज्येष्ठपुत्रः, श्रीविद्याधीशतीर्थानां ज्येष्ठभ्राता)

यः श्रीनिवासमृगराड् सकलान् मदान्ध-
मायाविसिन्धुरकुसुम्भगिरीन् विदार्य-
सत्तर्कतीक्ष्णनखरैर्विरराज मध्व-
सिद्धान्तचारुविपिने तमलं भजेऽहम् ॥ १ ॥

(शे.वा.च.)

श्रीनिवासाभिधाचार्यान् सर्वशास्त्रविशारदान्
ज्ञानभक्त्यादिसम्पन्नान् सर्वदा प्रणतोऽस्म्यहम् ॥ २ ॥

(प्र.ल.टि.)

इनोदयस्नानसुरार्चनाग्निहोत्रादिसत्कर्मरतातिशुद्धम ।
श्री श्रीनिवासाभिधमार्यवर्यं पितृव्यमानौम्यति-
धीरशिष्यकम् ॥ ३ ॥ (वा.र.मा. आदौ)

केशवभट्टारक(गुरुराज)स्तोत्राणि

(श्री आनन्दभट्टारकस्य तृतीयः पुत्रः)

विद्याधीशगुरोरशेषसमयानभ्यस्य माध्वीयसत्-
तन्त्रार्थं प्रविचार्य चानुहृदयं शास्त्रप्रवक्ताऽभवत् ।
दुर्वादीन्द्रसुभङ्गकृद्वरनदीस्नानाग्निहोत्रादिकृत्
श्रीमध्वेशवरार्चने रतमनाः श्रीकेशवार्याह्वयः ॥ १ ॥

(वा.र.मा. आदौ)

यद्व्याख्यानस्य शालात्वहमहमिकया शिष्यसङ्घेन पूर्णा
व्याख्याचातुर्यदूरीकृतकुमतिजना शिष्यवाक्सारयुक्ता ।
सायं ज्ञात्यादिशिष्यप्रसुतवरनावळ्यपूर्वान्नजात-
प्रीत्या युक्त्या गुरुं तं पितरमपि पतिं नौमि मे रूपदीपम् ॥ २ ॥
(वा.र.मा.)

यस्यानुग्रहलेशतोऽहमभवं विद्वत्सु मानाश्रयः
यद्वाचानुगतेर्मदीयवचनं विद्वन्मनोगोचरः ।
यो मच्छिक्षणसिद्धये मम करेणालेखयद् व्याकृतीः
तत्सेवां करवाणि कां तदुदितार्थालोचनादेः परम् ॥ ३ ॥
(वा.र.मा.)

(गड्डद) श्रीनिवासाचार्यः

(श्रीसत्यविजयस्वामिनां पूर्वाश्रमपिता, केशवभट्टारकस्य पुत्रः, रत्नमालाकर्तुः ज्येष्ठभ्राता)

यो वै शास्त्रचतुष्टयेऽतिनिपुणः दूरीकृताज्ञानकः
दुर्वादीन्द्रविदारणेऽतिचतुरः दाने तु कर्णोपमः ।
गुर्वानुग्रहवारिधिः मयि परं स्नेहं दयां चाकरोत्
ज्येष्ठभ्रातरमाश्रये सुमतये श्री श्रीनिवासं गुरुम् ॥ १ ॥
(वा.र.मा.)

DISTINGUISHED SCHOLARS AND AUTHORS OF PANDURANGI FAMILY

1. Anandabhattaraka Pandurangi (1500 to 1580 A.D.)

He is considered as Mūla Purusha, the first known ancestor of Pandurangi family. He lived in Punatambe in Ahmednagar district of Maharastra. He was a contemporary of Sri Raghūttamatirthā and Sri Vādirajatirtha. He was also the younger contemporary of Sri Vyāsaraja. He is the author of Nyayamrita Kantakoddhāra. This work is not yet fully printed. He is the father of Sri Vidyādhishatirtha (Full details of his biography are already given in the beginning while giving the biography of Sri Vidyādhishatirtha).

2. Pandurangi Śrinivasacharya (1530 to 1600 A.D.)

He is the eldest son of Anandabhattāraka. He studied under Sri Raghūttamatirtha and his father. He has written a commentary on Tatvaprakāsikā of Sri Jayatirtha. His commentary is named as 'Haritatvasubodhini'. This is not yet printed. He has also written a Prameya work which is not available.

When there was Muslim invasion on Punatambe he left that place and went to saptagodāvari region. His descendants are now in Vishākhapattanam, Vijayanagaram and Hyderabad. P. Kodanda Rao of Bangalore, P. Narasimha Rao of Vishākhapattanam are his descendants.

3. Pandurangi Narasimhacharya (Sri Vidyādhishatirtha) (1550 to 1630 A.D.)

Full details of his life and works are already given in the beginning.

4. Pandurangi Keshavacharya (Gururaja) (1570 to 1650 A.D.)

He is the third son of Anandabhattāraka. There is also a tradition that he is the son of Timmannabhatta the elder brother of Anandabhattāraka. However, he was brought up by Anandabhattāraka and Sri Vidyādhisha with great affection. He has written eighteen works in all. His commentary on Nyāyasudhā is known as Sheshavākyarthachandrikā. It is in continuation of Vakyārthachandrikā of Sri Vidyādhisha. It is one of the largest commentaries on Sudhā. He has written commentaries on Tātparyachandrikā of Sri Vyāsarāja, seven Prakaranas of Dashaprakaranas, Rigbhāshyatikā and a few minor works. Among Dvaita Tippanikaras he is next to Sri Raghavendratirtha and Srinivasatirtha in bulk and variety. His commentaries are very terse and full of shāstrārtha.

He gratefully acknowledges Sri Vidyadhishatirtha in all his commentaries as Gururāja. He states that he is writing his works with the blessings of Gururāja and as taught by him. Therefore his commentaries

are known as Gururājiya. This has further led to the fact that he himself is known as Gururāja. Therefore, his name Gururāja has to be taken in the sense that one who has written commentaries with the blessings of Gururāja viz., Sri Vidyādhishatirtha. He lived in Shurpali on the banks of river Krishna in Belgaum district. His vriksha is found in Shurpāli.

5. Gaddada Srinivasacharya (1590 to 1660 A.D.)

He is the eldest son of Keshavacharya (Gururaja). He is the grandson of Anandabhattāraka. However, according to another tradition he is the grandson of Timmannabhatta, the elder brother of Anandabhattāraka. His descendants in South India have preserved this tradition. This is also mentioned in Vākyārthàratnamālā a work of his younger brother. He is known as Gaddada Srinivāsāchārya as he used to have a beard. His biographical details are already given while giving the biography of his son i.e., Sri Satyavijayatirtha. He went and settled in Mannargudi, invited by Meruswamin. His descendants later spread to Kuttālam, Tanjore, Kumbhakonam, Māyāvaram, Salem and Madras. These people speak Marathi at home. Sri Madhvarāyāchārya of this line was the agent of Uttarādimatha at Madras. P. Ramachandracharya was professor of Sanskrit at Kumbhakonam. His son P. Bhiman is Chief Secretary to Govt. of Uttara Pradesh. Kuttalam Krishnamurthy

Acharya was a Ghanapathin. Sri Madhvacharya's sons P. Vasudevacharya and P. M. Ramachandra Rao are at Madras and are actively involved in Dvaita activities. Prayaga Madhavarao of this line is in Kumbhakonam. Ranganathacharya of Tirukoilur also belongs to this line. All Pandurangi families of Tamilnadu trace their ancestry to Sri Satyavijayatirtha, his father Gaddada Srinivasacharya, his father Keshavacharya (Gururaja) and finally to Timmannabhatta. The Pandurangi families of Kalasa, Chikkerur, and Ranebennur in Dharwad district are also the descendants of this Srinivasacharya.

6. Ratnamala Narasimhacharya (1600 to 1680 A.D.)

He is the second son of Keshavacharya (Gururaja). He studied under his father and his elder brother. He gratefully acknowledges his father Keshavacharya, his uncle Srinivasacharya (the author of Tatvasubodhini) and his elder brother Srinivasacharya (Gaddada). He mentions Timmannabhatta as his grandfather. This helps us to fix the relative position of these early members of Pandurangi family. He pays his respects to Sri Vidyadhishatirtha, Sri Satyanidhi, Sri Satyanātha and Sri Satyābhinava. His work Vākyārtharatnamālā is a commentary on Vākyārthachandrikā and Sheshavākyārthachandrikā. It is a large work of a thousand folios. Only one full manuscript of this work is available. Two or

three fragments are also available. It is yet to be printed. The Pandurangi families of Bhandivāda, Hubli, Kalaghatgi and Kadakol in Dharwad district are descendants of this Narasimhāchārya. The famous Pandurangi Krishnacharya of Sri Satyadhyanatirtha's times, is a descendant of this Narasimhacharya. His younger brother Jayacharya later became Sri Satyaprajnatirtha. The descendants of this family are mostly in Dharwad district. Sri Gururajacharya of Hubli who is now engaged in teaching Dvaitavedanta to a large number of disciples belongs to this line. He is the eldest son of Krishnacharya.

7. Mannari Babacharya (Sri Śatyavijaya) (1650 to 1737 A.D.)

He is the son of Gaddada Srinivasacharya. He lived in Mannargudi. He became Sri Satyavijayatirtha. Full details of his life are already given in the beginning.

8. Masuru Pandurangi Narasimhacharya (1700 to 1780 A.D.)

He belongs to the line of Sri Vidyadhishatirtha. Sri Vidyadhishatirtha's son Krishnacharya and grandson Sri Vidyadhishacharya lived in Shurpali on the banks of river Krishna. Then, this family moved to Masuru in Dharwad district as some villages were

donated to them by the rulers of Keladi. Masuru Narasimhacharya is the grandson of Sri Vidyadhishacharya. He was a contemporary of Sri Satyabodhatirtha. He is mentioned more than once in Sri Satyabodhavijaya. His vriksha (tree) is in Masuru on the banks of the river Kumudvati.

9. Masuru Pandurangi Balayyacharya (1750 to 1830 A.D.)

He is the son of Masuru Narasimhacharya. He was a great scholar and taught Dvaita Vedanta to a large number of disciples. He was a contemporary of Sri Satyasandha, Sri Satyavara and Sri Satyadharma. He brought Sri Vidyadhishatirtha's Pratima from Dharmapuri to Masuru. This was later taken to Ranebennur. He went to Gayā and Varanasi with Sri Satyasandha. He had six sons. All present Pandurangi families that are spread in Tumminakatti, Shimoga, Dharwad, Kittur, Kurubagatti etc., are the descendants of this Balayyacharya. Largest number of Pandurangis of Dharwad district belong to this line. This Masuru line and Misrakote line are direct descendants of Sri Vidyadhishatirtha and Ananda Bhattaraka while others belong to the line of Timmannabhatta and Keshavacharya. A stone Pratimā of Masuru Balayyacharya is worshipped in Yalagurda village. This was in Aluru and Chimmalagi earlier. Now it is brought to Yelagurda on the banks of river Krishna in Bijapur district. Tirupathi

Huchchacharya's Pratimā is also worshipped in this place.

10. Pandurangi Krishnacharya of Mysore (1800 to 1870 A.D.)

He is the eldest son of Masuru Balayyacharya. He was a contemporary of Sri Satyasamkalpa, Sri Satyasantusta and Sri Satyaparāyana. He used to have philosophical debate with a Visistadvaita scholar Ananda Alwar. Both Krishnacharya and Ananda Alwar were pet scholars of Sri Satyasantusta. His descendants are in Mysore, Srirangapatna and Bangalore. Ananda Alwar's descendants are in Melkote, Mysore and Bangalore.

11. Tumminakatti Huchchacharya (1859 to 1916 A.D.)

He is the great-grandson of Masuru Balayyacharya. He is the descendant of third son of Balayyacharya. His father moved from Masuru to Tumminakatti. He was a great scholar and taught Vedanta to a large number of disciples. The Pratimā of Vidyadhishatirtha that was in Dharmapuri was brought to Masuru by Balayyacharya. When most of the Pandurangi families left Masuru, this Huchchacharya brought it to Ranebennur and established a Matha. The three days āradhanā of Sri Vidyadhisha is now observed at Ranebennur. Huchchacharya's second son Pandurangi Ramacharya of Tumminakatti has

completed 106th year and is still engaged in teaching Vedanta. Prof. K. T. Pandurangi is the third son of Sri Tammannacharya the eldest son of this Huchchāchārya.

12. Thirupathi Pandurangi Huchchacharya (1865 to 1939 A.D.)

Tirupathi Huchchacharya is also the great-grandson of Masuru Balayyacharya. He is the descendant of the second son. He went to Kolhapur when he was still a young boy. He served Goddess Mahalakshmi for twelve years. Blessed by her he acquired great knowledge and spiritual power. He spent some years at Narasimhakshetra at Mugutkan Hubli on the banks of river Malaprabha in Belgaum district. Then he moved to Ranebennur and served Sri Vidyadhishatirtha. Finally he went to Tirupathi in 1900 and lived there until 1939. He never came down the hill all along these forty years. He conducted Sri Krishnachatra and provided all facilities to pilgrims. The Mahanta of Tirupati temple became his disciple and offered all facilities. He got a Krishna image at Tirupati in a miraculous way and worshipped it all along. He composed a few Sanskrit works and a large number of Devaranamas under the ankita 'Indiresha'. He had immense spiritual power which was made manifest on a few occasions. There is a Rekhāchitra of Sri Vyasaraja in the second Prākāra on the right

side of the main temple. At the feet of Sri Vyasaraja there is a Rekhāchitra of Sri Huchchacharya. His Vriksha (tree) is there at the Nāgavana on Tirumalai Hills.

Apart from the distinguished scholars and authors mentioned here, there were many more who are not mentioned here for want of information. In every generation there were scholars. This tradition is practically coming to a close. However, the members of this family may do well if they retain the main spirit of the family to serve the cause of knowledge in a suitable way, maintain good conduct, and generous attitude in life.

Retaining the family name as Pandurangi in future also may serve as an inspiration and help to retain the family and cultural identity.

Members of the different lines of Pandurangi family are requested to send the information regarding the distinguished persons in their line so that it can be incorporated in the next edition. Genealogy of Pandurangi families is prepared separately. The same will be sent on request.

K. T. Pandurangi

WORKS OF THE MEMBERS OF THE PANDURANGI FAMILY

1. Ananda Bhattaraka

1. न्यायामृतकण्टकोद्धारः—A commentary on Nyāyāmrita of Sri Vyāsarāja. This is a reply to Advaitasiddhi of Madhusudana Saraswati. A portion of this work was published in Calcutta University Sanskrit series in 1934. This portion is reprinted in 1985. The entire work is yet to be printed. Manuscript is available.

2. Pandurangi Srinivasacharya

1. हरितत्त्वसुबोधिनी — A commentary on Tatvaprakāsikā of Śrī Jayatīrtha. It is not yet printed. Its manuscript is available (MS).

3. Sri Vidyadhishatirtha (Pandurangi Narasimhacharya)

1. वाक्यार्थचन्द्रिका — A commentary on Nyāyasudhā (first five adhikaraṇas). This is printed in 1932 and 1985 (Pt).

2. विष्णुतत्त्वनिर्णयटिप्पणी—Not printed. Manuscript also is not available.

3. प्रमाणलक्षणटिप्पणी— — do —

4. कथालक्षणटिप्पणी— — do —

5. तलवकारोपनिषत्खण्डार्थः — do —

6. एकादशीनिर्णयः—Not printed. Manuscript is available.

7. जन्माष्टमीनिर्णयः— Not Printed
8. विष्णुपञ्चकनिर्णयः— — do —
9. तिथित्रयनिर्णयः— — do —
10. ॐकारवादः—Printed at Belgaum

4. Pandurangi Keshavabhattaraka (Gururaja)

1. शेषवाक्यर्थचन्द्रिका—A commentary on Nyāyasudhā (from Anandamayādhikarana onwards. Printed in 1932 and 1985.

2. सुधावाक्यार्थविनोदः—Another commentary on Nyāyasudhā. Not yet printed. Manuscript is available.

3. तात्पर्यचन्द्रिकाटिप्पणी—A commentary on Tātparyachandrikā of Sri Vyāsarāja printed in 1913, copies not available now.

4. न्यायामृतटिप्पणी—Only a few folios of the manuscript are available. Krodapatra type.

5. तत्त्वप्रकाशिकाटिप्पणी—Only a Portion of the manuscript is available.

6. व्याकरणप्रदीपितगीताभाष्यप्रमेयदीपिकाटिप्पणी—
Discussion of the grammatical points in Gitābhāshya and Prameyadipikā. Manuscript available.

7. ऋग्भाष्यटिप्पणी—A commentary on Rigbhāshyatikā. Not yet printed. Manuscript is available.

8. तत्त्वसंख्यानटिप्पणी—Printed in 1982.

9. तत्त्वोद्योतटिप्पणी— ,, 1971 by Rāddhānta Sabha

10. विष्णुतत्त्वनिर्णयटिप्पणी— ,, 1969 Printed

11. मायावादखण्डनटिप्पणी–Not yet printed. Manuscript is available.

12. मिथ्यानुमानखण्डनटिप्पणी — do —

13. प्रमाणलक्षणटिप्पणी — do —

14. कथालक्षणटिप्पणी — do —

15. मायावादखण्डनोपन्यासः — do —

16. वादीन्द्रधिक्कारः — do —

Details of the debate with Rangojibhatta and Vādindra.

17. भागवतटिप्पणी–A krodapatra type of commentary. Manuscript is not available.

5. Pandurangi Narasimhacharya (Ratnamalakara)

1. न्यायसुधावाक्यार्थरत्नमाला—A commentary on Vākyārthachandrikā and Seshavākyārthachandrikā. Not yet printed. Manuscript is available. About a thousand folios.

6. Pandurangi Ramakrishna

1. श्रुत्यर्थसङ्ग्रहः — A commentary on the sruti passages quoted in Brahmasūtrabhāshya. Not yet printed. Manuscript is available.

7. Pandurangi Srinivasacharya

1. प्रमाणमञ्जरी—An abridged edition of Pramānapaddhati. Not yet printed. Manuscript is available.

8. Pandurangi Madhavacharya Suta Keshavacharya

1. **विरोधोद्धारः** — Reconciliation of apparently conflicting statements in Bhāshya, Tīkā and Tippanis. About 135 instances. This author is a Tamilnadu Pandurangi. Manuscript is available.

9. Pandurangi Huchchacharya (Tirupathi)

1. **ब्रह्मसूत्रप्रमेयमाला**—Not yet printed. Manuscript is available.

2. **स्तोत्राणि**—A number of stotras of Srinivasa, Lakshmi, Durgā, Samira, Nārada, Purandara, Vidyādhisha etc. Not yet printed. Manuscript available.

3. **कन्नडसर्वमूल**—A summary of Sarvamūla works in Kannada. Not yet printed. Manuscript is available.

4. **देवरनामगळु**—About 500 Devaranāmas with the Ankita 'Indiresha'.

10. Pandurangi Krishnacharya (K. T. Pandurangi)

1. **तत्त्वमञ्जरी**—Kannada translation (Published)
2. **विष्णुतत्त्वनिर्णयः** — do —
3. **गीतातात्पर्यनिर्णयः** — do —
4. **सदाचारस्मृतिः** — do —
5. **ईशावास्य तलवकारकाठकोपनिषदः** — English translation
6. **षट्प्रश्नाथर्वणमाण्डूक्योपनिषदः** — do —

7. छान्दोग्योपनिषत् — English translation

8. बृहदारण्यकोपनिषत् —do—

9. Essentials of Yuktimallikā (English summary)

10. Essentials of Upanishads (English summary)

11. Essentials of Gitābhāshya and Gitātātparya (English summary)

12. उपनिषद्-दर्शन—A Kannada summary of Upanishads.

13. अणुविद्याधीशविजयः—An abridged edition

14. अणुसत्यबोधविजयः — do —

15. काव्याञ्जलिः—A collection of short Sanskrit poems.

Full details of the availability of printed works and manuscripts are given in the Kannada edition of Anuvidyādhishavijaya.

GENEALOGY OF PANDURANGI FAMILY

BRANCH–1 (Masuru, Tumminakatti)

1. Ananda bhattāraka (*Puntambe*)
2. Narasimhāchārya (*Śurpali*) (*Sri Vidyādhiśa*)
3. Krishnāchārya (*Śurpali*)
4. Vidyādhiśāchārya (*Śurpali*)
5. Vedavyāsāchārya (*Śurpali*)
6. Narasimhāchārya (*Masuru*)
7. Balāchārya (*Masuru*)

8. Narasimhāchārya (*Masuru*) (second son)
9. Srinivāsācharya (*Śikaripur*)
10. Huchchachārya (*Tirupati*)
11. Srinivāsāchārya (*Dharwad*)
12. Rāmāchārya (*Dharwad*) (Present)

8. Vedavyāsāchārya (*Masuru*) (third son)
9. Bālācharya (*Tamminakatti*)
10. Huchchachārya (*Tumminakatti*)
11. Tamanāchārya (*Dharwad*)
12. Krishnācharya (*Bangalore*) (K. T. Pandurangi) (Present)
13. Ananda (*U.S.A.*) (Present)

GENEALOGY OF PANDURANGI FAMILY

BRANCH–2 (Misrakote)

1. Anandabhattāraka (*Puntambe*)
2. Narasimhāchārya (*Sri Vidyādhiśaru*) (*Śurpali*)
3. Krishnāchārya (*Śurpali*)
4. Anandāchārya (*Śurpali*)
5. Krishnāchārya (*Śurpali*)
6. Annayyāchārya (*Masuru*)
7. Bābāchārya (*Masuru*)
8. Balāchārya (*Misrakote*)
9. Narasimhāchārya (*Misrakote*)
10. Srinivāsāchārya (*Misrakote*)
11. Venkannāchārya (*Misrakote*)
12. Rāmāchārya (*Misrakote*) (present)
13. Govinda (present)

GENEALOGY OF PANDURANGI FAMILY

BRANCH–3 (Bhandiwada–Kadkol)

1. Anandabhattāraka (*Puntambe*)
2. Keśavāchārya (*Śurpalli*) (Sri Gururāja)
3. Ratnamālā Narasimhāchārya (*Śurpalli*)
4. Rāmāchārya (*Śurpalli*)
5. Bābāchārya (*Bhandiwad*)
6. Annayāchārya (*Bhandiwad*)
7. Seenayyāchārya (*Karjagi*)
8. Appāchārya (*Kadakol*)
9. Rangāchārya (*Kadakol*)

Sons of 9. Rangāchārya:

- 10. Krishnāchārya (*Uttaradimatha*)
  - 11. Gururājāchārya (*Hubli*) (Present)
    - 12. Seturām (*U.S.A.*) (Present)
- 10. Jayāchārya (*Sri Satyaprajnaru–Uttaradimatha*)
  - 11. Ranganāth (*Kumta*) (Present)

GENEALOGY OF PANDURANGI FAMILY

BRANCH–4 (Chikkeruru-Ranebennuru)

1. Anandabhattāraka (*Puntambe*)
2. Keśavāchārya (*Śurpalli*)
   (Sri Gururaja)
3. Gaddad Srinivāsāchārya (*Śurpalli–Mannārgudi*)
4. Rāmachārya (*Mannārgudi*)
5. Mannāri Krishnācharya (*Ranebennuru*)
6. Rāmāchārya (*Ranebennuru*)
7. Srinivāsāchārya (*Ranebennuru*)
8. Krishnāchārya (*Chikkeruru*)
9. Rāmāchārya (*Chikkeruru*)
10. Venkataramanāchārya (*Chikkeruru*)
11. Krishnāchārya (*Chikkeruru*)
    (Present)
12. Raghavendra (*Chikkeruru*)
    (Present)

GENEALOGY OF PANDURANGI FAMILY

BRANCH-5 (Mannargudi-Kuttalam)

1. Anandabhattāraka (*Puntambe*)
   |
2. Keśavāchārya (*Śurpali*)
   (Sri Gururāja)
   |
3. Gaddada Srinivāsācharya (*Mannārgudi*)
   |

3. Narasimhāchārya — Bābāchārya (*Sri Satyavijaya*)

Line of Narasimhāchārya:

4. Gopālāchārya (*Mannārgudi*)
5. Vasudevāchārya (*Mannārgudi*)
6. Bindumādhavāchārya (*Mannārgudi*)
7. Keśavāchārya (*Mannārgudi*)
8. Vyāsāchārya (*Kumbhakonam*)
9. Rāmachandrachārya (*Kumbhakonam*)
   (Prof. P. Ramachandra Rao)

Children of Rāmachandrachārya:

10. Vyāsabhiman
    (P. V. Bhiman)
    (Present)

10. Raghavendra
    (Present)

GENEALOGY OF PANDURANGI FAMILY

BRANCH–6 (Visakhapattana)

1. Anandabhattāraka (*Puntambe*)

2. Srinivāsāchārya (*Saptagōdāvari Pradeśa*)
(elder brother of Sri Vidyādhiśa)

10. P. Kodanda Rao
(*Bangalore*)

10. P. Narasimha Rao
(*Viśakhapattana*)

11. Sons of Narasimha Rao (*Viśakhapattana*)
(Present)

The Pandurangi family has spread into Six main branches : 1. Masuru–Tamminakatti, 2. Miśrakote 3. Bhandiwād–Kodakol 4. Ranebennuru–Chikkeruru–Kalasa 5. Mannārgudi–Kuttālam–Tanjore–Kumbhakona 6. Viśākhapattana. Detailed genealogy of these is prepared. However, as it was not feasible to include the entire lists of all six branches in this small book, one family from each branch is selected and included here. Others can find the connection of their family at one or the other generation of the respective branches. Detailed genealogy is separately printed and can be obtained from Professor K. T. Pandurangi.

While preparing the detailed genealogy it was found that most of them come upto 11th generation. Therefore, the present members of the respective branches are requested to send further
…or errors and gaps are also likely,
…d genealogy charts with them are
…hand written copies of the same.